भुवनेश्वरीस्तोत्रम्.
भुवनेश्वरीकवचम्.
अन्नपूर्णाकवचस्तोत्रे.
त्रिपुराकवचस्तोत्रे.
दुर्गाशतनामस्तोत्रकवचे.
महिषमर्दनीस्तोत्रकवचे.
लक्ष्मीस्तोत्रकवचे.
सरस्वतीस्तोत्रकवचः.
गणेशस्तोत्रम्.
हरिद्रागणेशकवच.
विष्णुस्तोत्र.
रामस्तोत्र.
रामाष्टोत्तर.
रामकवच.
कृष्णस्तोत्र.
गोपालस्तोत्र.
कृष्णकवच.
नृसिंहकवच.
शिवस्तोत्रकवच.
वटुकभैरवस्तोत्र.
भैरवीस्तोत्रकवच.
श्रीविद्यास्तोत्र.
किङ्किणीस्तोत्र.
श्रीविद्याकवच.
महात्रिपुरसुन्दरीकवच.
प्रचण्डचण्डिकास्तोत्रकवच.
श्यामास्तोत्रकवच.
तारास्तोत्रकवच.
त्रैलोक्यमोहनताराकवच.
बगलामुखीस्तोत्र.
चतुःषष्ट्युपचार.
अष्टादशोपचार.
षोडशोपचार.
दशोपचार.
पञ्चोपचार.
मण्यादिद्रव्यनिर्माल्यकथनम्.
त्रिपुरसुन्दरीषोडशोपचारः.
रुद्राक्षमाहात्म्यम्.
नैमित्तिकादिकर्मनाशप्रायश्चित्तम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिभाषा.
विष्णवाराधनमन्त्राः.
वैष्णवद्वादशविधशुद्धिः.
मन्त्रदेवतानिरूपणम्.
योगाङ्गासनमुद्रालक्षणम्.
धारणयन्त्राणि.
धारणयन्त्रलेखनद्रव्याणि.
प्रयोगानन्तराभिषेकः.
नैमित्तिकविधिः.
सङ्क्षेपसर्वपूजाविधिः.
प्रयोगविधिः.
निग्रहाद्युपायः.
वेतालादिसिद्धिः.
बालकसंस्कारः
भागादिबलिः.
कुलाचारनिरूपणम्.
शिवाबलिः.
प्रातःकृत्यम्.
दूतीयोगः.
यजनप्रकारः.
मांसादिशोधनम्.
शक्तिशोधनम्.
श्रीविद्यायां विशेषकथनम्.
वीरपुरश्चरणम्
आन्तरपूजा.
योगप्रक्रिया.

---

No. **7848.** तन्त्रसारः.
TANTRASĀRAḤ.

Pages, 61. Lines, 14 on a page.

Begins on fol. 158*a* of the MS. described under No. 5586, wherein this is shown as Bhairavatantra in the list of other works.

Kālīprakaraṇa only.

---

No. **7849.** तन्त्रसारः.
TANTRASĀRAḤ.

Pages, 40. Lines, 14 on a page.

Begins on fol. 157*a* of the MS. described under No. 5568, wherein this is shown as Bhairavatantra among the other works.

Deals with the several kinds of Mantras addressed to the goddess Kālī. A person who has knowledge of these Mantras is considered to become free from the bondage of Saṁsāra even before death.

Same as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथ वक्ष्ये महाविद्याः कालिकायास्सुदुर्लभाः ।
यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥
नात्र चित्तविशुद्धिस्स्यान्नारीमित्रादिदूषणम् ।
न वा प्रयासबाहुळ्यं समयासभयादिकम् ॥
न वित्तव्ययबाहुळ्यं कायक्लेशकरं न च ।
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ।

**End:**

तिथिवारे च नक्षत्रे आकुळे स्थायिनो जयः ।
कुळाख्ये जयिनो नित्यं समं चैव कुळाकुळे ॥
एवं कुळाचारादिकं ज्ञात्वा साधकः कर्म कुर्यात् ॥

**Colophon:**

इति श्रीतन्त्रसारे कुळाचारविधिः ॥
इति श्रीतन्त्रसारे काळीप्रकरणं सम्पूर्णम् ॥

---

## No. 7850. तृचकल्पः.
## TṚCAKALPAḤ.

Pages, 16. Lines, 23 on a page.

Begins on fol. 158*a* of the MS. described under No. 446.

Complete.

Deals with the details connected with the worship of the sun by repeating the three Ṛks. 11 to 13 of the 50th Sūkta in the First Maṇḍala of the Ṛgvēda. The offering of oblations of water while repeating these is considered to have the power to enable one to accomplish one's desires.

**Beginning:**

एवंगुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य समस्तपापक्षयद्वारा सर्वकाम्यार्थफलसिद्ध्यर्थं . . . . . . . .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्यन्नद्येति तृचमन्त्रेण रक्तचन्दनमिश्रिततिलतण्डुलयवदूर्वाकुसुमजलपूरिताम्रपात्रेण अर्घ्यप्रदानं करिष्ये । अस्य श्रीतृचमन्त्रस्य कण्वपुत्रः प्रस्कण्व ऋषिः, अनुष्टुप् छन्दः, मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करा देवता ।

**End:**

मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः इदमर्घ्यं समर्पयामि ॥

**Colophon:**

इति तृचाविधानमहासौरमन्त्रकल्पः समाप्तः ॥

* * * *

द्वादशलक्षं वा तृचमन्त्रेण पुरश्चरणं मन्त्रसिद्धिः भवति ॥

---

## No. 7851. तृचकल्पविधिः.

## TṚCAKALPAVIDHIḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 141*b* of the MS. described under No. 7758.

Complete.

Deals with the manner ot conducting the worship of the sun.

**Beginning:**

भक्त्या कृष्णं नमस्कृत्य अर्जुनः परिपृच्छति ।
तृचमन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यहं प्रभो ॥
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ॥

* * * *

वृत्तं त्रिकोणं वृत्तं च षट्कोणं वृत्तयुग्मकम् ।
दलाष्टकयुतं बाह्यं बीजाक्षरयुतं लिखेत् ॥
इति यन्त्रं समालिख्य भास्करस्य महर्षिभिः ।

**End:**

कृत्वा समर्पयेत्पूजां यस्य स्मृत्येति मन्त्रतः ।
कृतस्य कर्मणस्साद्गुण्यार्थं वैकल्यनुत्तये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाशान्तिं जपेदत्र सर्वारिष्टनिवारणम् ।
शतं द्वादश वा वारे भानोर्विप्रांस्तु भोजयेत् ॥
एवं सूर्यार्घ्यकरणे सर्वाभीष्टं भवेद्ध्रुवम् ।
कर्तुः कारयितुश्चैव शीघ्रमेव न संशयः ॥

**Colophon:**

इति श्रीपद्मपुराणे श्रीकृष्णार्जुनसंवादे जगद्धितार्थाय तृचकल्पविधिः समाप्तः ॥

---

No. **7852.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 33. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 204, and not on fol. 18*a* as shown therein.

Incomplete.

Similar to the above.

The hymns are considered to have the power of removing one's sins, of curing diseases, destroying one's enemies and conferring on one the enjoyments of life and also soul-salvation.

**Beginning:**

उत्पतन्तीह भूतानि पृथिव्यन्तरवासिनाम् ।
आसनादौ नमस्कृत्य ब्रह्मकर्म समारभे ॥
अपसर्पन्तु ये भूताः . ते नश्यन्तु शिवाज्ञया ॥

* * * *

उद्यन्नद्येति मन्त्रोऽयं सारः पापप्रणाशनः ।
रोगघ्नश्च द्विषद्घ्नश्च भुक्तिमुक्तिफलप्रदः ॥
कण्वेन तु पुरा द्रूपं(दृष्टं)गुह्यं परमसिद्धिदम् ।
पुत्रस्य रोगनाशाय ब्रूहि लोकहिताय च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

बलिर्विभीषणो भीष्मः कपिलो नारदोऽर्जुनः ।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतश्शिवः ॥
विष्वक्सेनोऽथ वाक्रूरस्सनकाद्याश्शुकादयः ।
महाविष्णुप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
हृद्रोगं देवरोगं च द्विषन्तं नाशयेत्सकृत् ।
रोगाद्वा वन्ध्यनिर्मुक्तः पुत्रपौत्रप्रदोऽर्थिनाम् ॥

**Colophon :**

इति तृचकल्पः सम्पूर्णः ॥

---

No. **7853.** तृचकल्पः.

TṚCAKALPAḤ.

Substance, palm-leaf. Size, 11⅜ × 1¼ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Similar to the above.

Gives the purposes for which the Mantra should be repeated and also the details connected with the repetition thereof.

**Beginning :**

अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ॥
रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः ।
कर्णे(ण्वे)न तु पुरा दृष्टो गुह्यः परमसिद्धिदः ॥

**End :**

यन्त्रदेवताप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, अनुष्टुप् छन्दः, ऋग्यजुस्सामाथर्वाणो देवता, यन्त्रदेवताप्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः । अमुष्य प्राण इह प्राणः सर्वयन्त्रजीवाय सर्वमन्त्रजीवाय ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः तिष्ठति साम इत्यष्टोत्तरशतं जपित्वा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7854. तृचकल्पः.

## TṚCAKALPAḤ.

Pages, 13. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under **No.** 7156, wherein this is mentioned as Sūryōpāsanavidhi among the other works.

Incomplete.

Similar to the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थम् आदित्यपुराणोक्ततृचकल्पविधानेन हरिहरब्रह्मात्मकस्य मित्रादिद्वादशनामात्मकस्वरूपेण द्वादशावरणसहितस्य त्रयीमूर्तेर्भगवतः सूर्यदेवस्य प्रीतिं कामयमानः . . . . . . . . . . . . . . . षोडशोपचारपूजाप्रसन्नार्घ्यसौरमन्त्रैर्द्वादश महानमस्कारांश्च करिष्ये । अस्य श्रीतृचमन्त्रस्य कण्वपुत्रप्रस्कण्वः ऋषिः, अनुष्टुप् छन्दः ।

**End:**

पादार्धर्चर्चेनैव तृचा होमं समाचरेत् ।
जयाद्यङ्गाहुतीर्हुत्वा पूर्णाहुतिमथाचरेत् ॥
कौशेयेनाखण्डितेन होमद्रव्याणि वेष्ट्य च ।
पूर्णाहुतिं चरेद्धीमानुत्तरं परिषेचनम् ॥
यावन्नमस्कारदिने नीलकण्ठं ग्रहाधिपम् ।
* * * *
स्वयं भुञ्जीत वै स्तोत्रं कुर्यादाद्याभिरादरात् ॥

---

## No. 7855. तृचकल्पः.

## TṚCAKALPAḤ.

Substance, palm-leaf. Size, $14 \times 1\frac{1}{8}$ inches. Pages, 38. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 32*a*. The other works herein are Raghuvaṁśa



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



1*a*, Prātassmaraṇīyaślōkāḥ 52*a*, Kṛṣṇaviṣayagāna 53*a*, Dhūmapānadaṇḍaka 54*a*, Telugu Padyamulu 56*a*, Samāsacakra 71*a*.

Incomplete.

Similar to the above.

**Beginning:**

नारदं(द उवा)च—

(भक्त्या कृष्णं) नमस्कृत्य अर्जुनः परिपृच्छति ।
तृचमन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यह प्रभो ॥
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।

श्रीकृष्ण उवाच —

उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ॥
रोगघ्नश्च द्विषद्घ्नश्च भुक्तिमुक्तिफलप्रदः ।

**End:**

हरिमाणं निदध्मसि—मरीचिं तर्पयामि । उदगादयमादित्यः—आदित्यं तर्पयामि । विश्वेन सहसा सह—सवितारं तर्पयामि । द्विषन्तं मह्यं(म)रन्

---

No. **7856.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 7156, wherein this is mentioned as Sūryanamaskāra among the other works.

Complete.

Contains the details connected with the repetition of the Mantra.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थं तिलतण्डुलयवदूर्वाङ्कुरकुसुमरक्तचन्दनकांस्यपात्रेण अर्घ्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदानानि करिष्ये । ओं ह्रां उद्यन्नद्य मित्रमहः—मित्राय नमः अङ्गुष्ठाभ्यां नमः ओं ह्रीं आरोहन्नुत्तरां दिवम्—रवये नमः तर्जनीभ्यां नमः । ओं ह्रूं हृद्रोगं मम सूर्य ।

**End:**

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य . . द्विषतो रधम् । मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः इदमर्घ्यं समर्पयामि । अनेन प्रकारेण द्वादश नमस्कारान् कुर्यात् । छायासमेतश्रीसूर्यनारायणाय नमः इदमर्घ्यं समर्पयामि ॥

---

## No. 7857. तृचकल्पः.
## TṚCAKALPAḤ

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5937, wherein this is mentioned among the other works as Sūryanamaskāravidhi.

Complete.

Similar to the above.

**Beginning:**

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । . .
शुभार्थे च शुभे शोभनमुहूर्ते अत्र पृथिव्यां जम्बूद्वीपे . .
शुभतिथौ मम समस्तपापक्षयद्वारा सर्वकाम्यार्थसिद्ध्यर्थे सर्वरोगानिवृत्त्यर्थं छायासमेतश्रीसूर्यनारायणमुद्दिश्य . . . . . . . . . . . ताम्रपात्रेणार्घ्यप्रदानानि करिष्ये तदङ्गकलशाराधनानि करिष्ये । कलशस्य मुखे विष्णुः . . . क्षयकारकाः । अस्य श्रीतृचमहामन्त्रस्य कण्वपुत्रः प्रस्कण्व ऋषिः, अनुष्टुप् छन्दः, मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करा देवता । . . . . . . . . .



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरान्दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे । हरिमाणं निदध्मसि । उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन् । मो अहं द्विषतो रधम् ।

**End:**

अर्घ्याणि द्वादशावृत्त्या लघुरेवं निगच्छति ।
लघुना द्वादशावृत्त्या महार्घ्यं सन्निगच्छति ॥
महार्घ्यं द्वादशावृत्त्या क्षयरोगात्प्रमुच्यते ।
उत्तमं द्वादशार्घ्यं तु मध्यमं षट् प्रशस्यते ॥
चत्वार्यर्घ्यत्र(ाणि)दातव्यअ(न्य)भावे तु दिने दिने ।

---

No. **7858.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 44. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No. 5937, wherein this is mentioned among the other works as Sūryārghyavidhi.

Incomplete.

Similar to the above.

**Beginning:**

एवङ्गुणविशेषणाविशिष्टायां शुभातिथौ श्रीमान् गोत्रः नामधेयः धर्मपत्नीसमेतोऽहं श्रीमतः गोत्रस्य नामधेयस्य धर्मपत्नीसमेतस्य मम. . . द्वारा आदित्यपुराणोक्तफलसिद्ध्यर्थं श्रीसूर्यनारायणमुद्दिश्य . . . रक्तचन्दनमिश्रिततिलतण्डुलयवदूर्वाकुसुमजलपूरितताम्रपात्रेण अर्घ्यप्रदानानि करिष्ये ।

अस्य श्रीतृचमन्त्रस्य कण्वपुत्र ऋषिः प्रस्कण्वः, अनुष्टुप् छन्दः, मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करा देवता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अर्कभास्कराभ्यां नमः इद. मि। ओं ह्रां ह्रीं उद्यन्नद्य मित्र-
महः। आरो. दिवम्। हृद्रोगं. सूर्य। हरि. नाशय। मित्ररविसूर्यभानुभ्यो
नमः इद. मि। ह्रौं ह्रः शुकेषु.. णम्। रोप. ध्मसि। अदो(थो)..ने।
हरि.. ध्मसि खगपूषहिरण्यगर्भमरीचिभ्यो नमः। इद. मि।

---

## No. 7859. तृचकल्पः.

## TṚCAKALPAḤ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Taittīriyōpaniṣadbhāṣya 8*a*.

Incomplete.

Beginning same as in the above.

**End:**

एहि सूर्य सहस्रांशो तेजोराशिजगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते॥
श्रीसूर्यनारायणाय नमः—प्रसन्नार्घ्यं समर्पयामि।
पूर्वोक्तैवङ्गुण . . . शुभतिथौ यजमानस्य सकलरोगनिवृत्तिद्वारा
क्षिप्रमेवारोग्यसिद्ध्यर्थं पादार्घ्यर्चतृचमन्त्रप्रकारेण अर्घ्यप्रदानानि करिष्ये.

---

## No. 7860. तृचकल्पः.

## TṚCAKALPAḤ.

Pages, 5. Lines, 21 on a page.

Begins on fol. 3*a* of the MS. described under No. 2373, wherein this is mentioned as Tṛca-arghyapradāna among the other works.

Complete.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

तृचार्घ्यप्रदानम्—

एवंगुणविशेषणविशिष्टायां तिथौ सूर्यनारायणप्रसादसिद्ध्यर्थं नित्यार्घ्यप्रदानं करिष्ये ।

ओं भूर्भुवस्सुवः ओं ह्रां उद्यन्नद्य मित्रमहः मित्राय नमः इदमर्घ्यम् । ओं भूर्भुवस्सुवः ओं ह्रीं आरोहन्नुत्तरान्दिवं रवये नमः इदमर्घ्यम् ।

**End:**

ओं भूर्भुवस्सुवः ओं ह्रूं हृद्रोगं मम सूर्य सूर्याय नमः इदमर्घ्यम् ।

मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीचिसवित्रादित्यार्कभास्करेभ्यो नमः इदमर्घ्यम् । पादार्धर्चर्चैस्तृचेन त्रिरावृत्तिं कुर्यात् । उद्यन्नद्य मित्रमहः द्विषतो रधम् । इत्यष्टोत्तरशतजपं कुर्यात् ॥

---

## No. 7861. तृचकल्पः.

## TṚCAKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 365, wherein this is shown as Tṛcārghyapradāna in the list of other works.

Complete.

Same as the above.

---

## No. 7862. त्रिपुरामन्त्रकल्पः.

## TRIPURĀMANTRAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 125*b* of the MS. described under No. 5683, wherein this is shown as Tribhuvanamōhinītripurāmantra.

Incomplete.

Describes the Tripurāmantra and its various subdivisions.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथ भगवदिच्छाशक्तिरूपत्रिपुरा[रि]मन्त्राराधनविधिर्वक्ष्यते—

तत्र त्रिपुरामन्त्रस्त्रिविधः त्रिभुवनमोहिनी, षट्पुटत्रिपुरा, महात्रिपुरेति। तत्राद्यमन्त्रः सबिन्दुकद्वादशस्वरः ककारलकारचतुर्थस्वरबिन्द्वात्मकं द्वितीयं बीजम् इति बीजत्रयात्मको बालामन्त्रः। द्वितीयस्य हकारसकाररेफयुक्तबिन्द्वन्तैकारः इत्येकं बीजं हकारसकारककारलकाररेफबिन्द्वन्तचतुर्थस्वरयुक्तं द्वितीयं बीजम्।

* * * *

सर्वस्य त्रिपुरामन्त्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिः छन्दः, त्रिपुरा सरस्वती देवता।

**End:**

अक्षस्रक्पुस्तककरा रक्ताभास्सर्वशक्तयः।
दिव्याम्बरास्सर्वभूषास्सर्वाभीष्टप्रदायिकाः॥

अनन्तरं ब्रह्माण्याद्दिमातृगणं चण्डिकान्तमष्टकोणेषु पूजयेत्।

असिताङ्गोऽरुरुश्चण्डः क्रोध उन्मत्तसंज्ञिकः।

---

No. **7863.** त्र्यम्बककल्पः.

TRYAMBAKAKALPAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 8\frac{1}{2}$ inches. Pages, 19. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in Kuṇḍalakṣaṇa.

Incomplete.

Gives the characteristics of the Tryambakamantra and the method of repeating it. The Mantra is considered to be efficacious in keeping off diseases.

**Beginning:**

आश्रमस्थं सुखासीनं वसिष्ठं जगतः परम्।
ब्रह्मचर्येण तपसा योगैश्वर्यसमन्वितम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणम्य शिरसा भूमौ गर्गस्तु प(रिपृच्छ)ति ।
श्रुतास्तु बहवो मन्त्राः सर्वकामफलप्रदाः ॥
त्रैयम्बकस्य माहात्म्यं श्रोतुमिच्छामि साम्प्रतम् ।
एवं पृष्टः प्रसन्नात्मा तं प्रत्याह महामुनिः ॥

वसिष्ठः—

महता तपसा दृष्टा मृतसञ्जीविनी मया ।
नासाध्यमनया किञ्चित् त्रिषु लोकेषु विद्यते ॥

**End :**

उपजिह्वेति सा प्रोक्ता लक्ष्मीस्तत्र प्रतिष्ठिता ।
कुण्डस्य मध्यमे भागे अमेरास्यं विदुर्बुधाः ॥

---

No. **7864.** त्र्यम्बककल्पः.

TRYAMBAKAKALPAḤ.

Pages, 52. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 3664.

Complete.

Similar to the above.

**Beginning :** Same as in the above.

**End :**

अक्षिरोगे समुत्पन्ने यस्य यस्य तु मन्त्रवित् ।
मन्त्रं जप्त्वा तु तत्तैलं तैलमक्ष्णो(र्विनिक्षिपेत्) ॥
तच्छान्तिर(श्च) भवेत् क्षिप्रं तथा शूलादिनाशनम् ।
अपस्मारादिकुष्ठान्तसर्वरोगादि(न् वि)नाशयेत् ॥

---

No. **7865.** त्र्यम्बककल्पः.

TRYAMBAKAKALPAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 6*a* of the MS. described under No. 124.

Incomplete. Breaks off in the 14th Paṭala.

Similar to the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following Paṭalas :—

| | |
|---|---|
| १. मन्त्रध्यानम्. | ८. काम्यकर्मनिरूपणम्. |
| २. पुरश्चरणलक्षणम्. | ९. उच्चाटनादि. |
| ३. कुण्डलक्षणम्. | १०. शत्रुमारणम्. |
| ४. मन्त्रविनियोगः. | ११. मन्त्रफलकथन. |
| ५. मन्त्रोपायान्तरकथनम्. | १२. शत्रुविजयः. |
| ६. रक्षाविधिः. | १३. अभिचारशान्तिः. |
| ७. शान्तिविधिः. | १४ गजहितकथनम्. |

**Beginning :**

वासिष्ठत्र्यम्बकमुच्यते—

आश्रमस्थं सुखासीनं वसिष्ठं ब्रह्मणा पुरा ।
त्रियम्बकस्य माहात्म्यं श्रोतुमिच्छामि सुव्रत ॥
एवं पृष्टः प्रसन्नात्मा तं प्रत्याह महामुनिः ।

वसिष्ठ उवाच—

महता तपसा दृष्टा मृतसञ्जीविनी मया ॥
नासाध्यमनसा(या) किञ्चित्त्रिषु लोकेषु विद्यते ।
विधिवत्संप्रवक्ष्यामि समाहितमनाश्शृणु ॥
ब्रह्मणा च ऋषिः प्रोक्तः छन्दोऽनुष्टुबिहोच्यते ।
देवता त्र्यम्बको रुद्रः षडङ्गानि शृणु द्विज ॥

**End :**

आभिचारे च शान्तौ च दानं तर्पणमाचरेत् ।
जपन्नित्यं प्रकुर्वीत ब्राह्मणांश्चापि भोजयेत् ॥

**Colophon ;**

इति त्रयोदशपटलः ॥

अथातः संप्रवक्ष्यामि गजानां हितकाम्यया ।
पूर्वेद्युर्गजराजश्च कृत्वा कौतुकबन्धनम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदोषे समयेऽतीते मुहूर्ते सुमनोहरे ।
ध्यायेत्त्रियम्बकेत्येवं य ऋचा . . . ॥
ततश्च वासुकिं ध्या.

---

## No. 7866. दक्षिणामूर्तियन्त्रम्.
## DAKṢIṆĀMŪRTIYANTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 176*a* of the MS. described under No. 7247.

Complete.

Gives the method of drawing and consecrating the Yantra or mystic diagram relating to Dakṣiṇāmūrtimantra. The Yantra is considered to have the power to make the wearer learned.

**Beginning:**

दक्षिणामूर्तियन्त्रम्—

यन्त्रं श्रीदक्षिणामूर्तेः सर्वविद्याप्रदायकम् ।
वद मे योगिनां श्रेष्ठ मार्कण्डेय महामुने ॥

मार्कण्डेय उवाच—

वक्ष्यामि दक्षिणामूर्तेर्यन्त्रं सर्वार्थदायकम् ।
यस्य श्रवणमात्रेण कविर्भवति मानवः ॥

* * * *

संलिख्यैतन्महायन्त्रं पूजयेत्पार्वतीपतिम् ।
महाकविर्भवेन्मन्त्री सर्वविद्यासुनिष्ठितः ॥

**End:**

एतद्यन्त्रं समालिख्य प्राणस्थापनमाचरेत् ॥
पूजयेद्धारयेद्विद्वान् गुलिकीकृत्य यत्नतः ।
महाकविर्भवेन्मन्त्री बृहस्पतिसमो नरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अचलां श्रियमाप्नोति सर्वदा विजयी भवेत् ।
कामसौन्दर्यमाप्नोति तेजस्वी सूर्यवद्भवेत् ॥

**Colophon:**

इति दक्षिणामूर्तियन्त्रं संपूर्णम् ॥

---

No. **7867.** दत्तात्रेयचक्रम्.

DATTĀTRĒYACAKRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No 5868.

Complete.

On the method of drawing and worshipping the Cakra or the mystic diagram relating to Dattātrēyamantra.

**Beginning:**

आदौ वृत्तौ(त्तं) समालिख्य चतुरश्रं ततः परम् ।
पश्चादष्टदलं पद्मं लिखेद्भूपुरमेव च ॥

**End:**

एह्येहीत्यष्ट बीजानि दलेष्वष्टसु विन्यसेत् ॥
तत्सन्धिष्वङ्गमन्त्राश्च समन्तात्परिपूरयेत् ।
अकारादिक्षकारान्तैर्बिन्दुभिर्मातृकाक्षरैः ॥

---

No. **7868.** दत्तात्रेयतन्त्रम्.

DATTĀTRĒYATANTRAM.

Substance, paper Size, 8⅛ × 6⅝ inches. Pages, 50. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete

It is stated in the MS. that it was written on the 8th of the month of Paṅguni in the year Akṣava.

This work treats of Indian magic and mysticism as may be seen from the following list of Paṭalas contained therein :—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१. उपोद्घातः.
२. मारणम्.
३. मोहनम्.
४. स्तम्भनम्.
५. विद्वेषणम्.
६. उच्चाटनम्.
७. सर्ववशीकरणम्.
८. स्त्रीवशीकरणम्.
९. पुरुषवशीकारः.
१०. आकर्षणम्.
११. इन्द्रजालादिकौतुकम्.
१२. यक्षिणीमन्त्रविधानम्.
१३. रसायनम्.
१४. कालज्ञानम्.
१५. अनाहारः.
१६. अन्नाहरणम्.
१७. निधिदर्शनम्.
१८. वन्ध्यागर्भधारणम्.
१९. विजयप्रदम्.
२०. सर्पादिनिवारणम्.

**Beginning:**

श्रीदत्तात्रेय उवाच—

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
दत्तात्रेयः पर्यपृच्छच्छङ्करं लोकशङ्करम् ॥

* * * *

अथ तत्संप्रवक्ष्यामि दत्तात्रेय तथा शृणु ।
कलौ सिद्धिर्महातन्त्रं विना कीलेन कथ्यते ॥

न तिथिर्न च नक्षत्रं नियमो नास्ति वासरः ।
न व्रतं नियमं होमं कालवेलाविवर्जितम् ॥

* * * *

**Colophon:**

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे प्रथमः पटलः ॥

**End:**

पुष्यार्के च गृहीत्वा तु श्वेतार्कस्य तु मूलकम् ॥
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सर्पवृश्चिकाग्निनिवारणं नाम विंश[ति]: पटलः ॥

* * * *

महादारिद्र्यहरणं महापातकनाशनम् ।
यावज्जीवति सा लोके ग्रहपीडा न बाध्यते ॥

अथ मन्त्रः—

ओं नमो भास्कराय अमुकं सर्पग्रहाणां पीडानाशनं कुरु कुरु स्वाहा ॥

**Colophon:**

इति श्रीइन्द्रजालाख्यस्समाप्तोऽयं ग्रन्थः ॥

---

## No. 7869. दत्तात्रेयतन्त्रम्.

## DATTĀTRĒYATANTRAM.

Substance, paper. Size, $9\frac{5}{8} \times 4\frac{1}{8}$ inches. Pages, 56. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in Paṭalas 1 to 22.

Same as the above.

See under the previous number for the beginning.

**End:**

अथाग्निवारणम्

उत्तरस्यां च दिग्भागे मरीचो नाम राक्षसः ।
तस्य मूत्रपुरीषाभ्यां हस्तौ स्तम्भो स्वाहा ॥

अनेन मन्त्रेण सप्ताञ्जलि जलं गृहीत्वाग्निमध्ये निक्षिपेत् । अग्निश्शाम्यति ।

गृहीत्वा रविवारे तु श्वेतकरवीरमूलकम् ।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति दत्तात्रेयतन्त्रे सिंहव्याघ्रादिनिवारणं नाम द्वाविंश[ति]: पटलः ॥
इति दत्तात्रेयतन्त्रं सम्पूर्णम् ॥ इदं रङ्गनाथस्य.

---

No. **7870.** दत्तात्रेयतन्त्रम्.

DATTĀTRĒYATANTRAM.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 43. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Complete in Paṭalas 1 to 20.

This is a treatise on Indian magic; also known as Indrajāla. See under No. 7868 for the beginning.

**End:**

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सर्पवृश्चिकाग्निनिवारणं नाम विंशः पटलः ॥

* * * *

महादरिद्रहरणं महापातकनाशनम् ।
यावज्जीवति सा लोके ग्रहपीडा न बाध्यते ॥

अथ मन्त्रः—

ओं नमो भास्कराय अमुकं सर्वग्रहाणां पीडानाशनं कुरु कुरु स्वाहा ॥

**Colophon:**

इति श्रीइन्द्रजालाख्यस्समाप्तोऽयं ग्रन्थः ॥

---

No. **7871.** दत्तात्रेयद्वादशाक्षरमन्त्रराजमन्त्रन्यासविधिः.

DATTĀTRĒYADVĀDAŚĀKṢARAMANTRARĀJA-MANTRANYĀSAVIDHIḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 5445.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Describes the method of repeating the twelve-syllabled Dattātrēyamantra accompanied by the required ceremonial touching of the several parts of the body.

**Beginning :**

अथ द्वादशाक्षरमन्त्रन्यासः—

तत्रादौ मूलेन प्राणायामत्रयं कृत्वा ।

अस्य श्रीदत्तात्रेयद्वादशाक्षरमन्त्रराजमहामन्त्रस्य श्रीसदाशिव ऋषिः, जगती छन्दः, दत्तात्रेयः परमात्मा देवता ; द्रां बीजं, स्वाहा शक्तिः, क्रों कीलकं, श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे विनियोगः —इति ऋष्यादीन् शिरोवदनहृदयदक्षवामस्तनहृत्करसंपुटेषु न्यसेत् ।

**End :**

एवमन्तर्यागं कृत्वा ततश्चगुरुन्मीरे मातृकावर्णमालया रुद्राक्षमालया वा नित्यं कुर्यात् ॥

**Colophon :**

इति सप्तमः परिच्छेदः ॥

---

## No. 7872. दत्तात्रेयद्वादशाक्षरादिमन्त्रोद्धारः.

## DATTĀTRĒYADVĀDAŚĀKṢARĀDIMANTRŌDDHĀRAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 11*a* of the MS. described under No. 5868.

Complete.

Deals with the order of arrangement of the syllables constituting the eight kinds of Dattātrēyamantra. The repetition of these Mantras is said to have the power to enable one to accomplish one's objects and to confer on one longevity, wealth, happiness, etc.

**Beginning :**

अष्टमन्त्रोद्धारः—

द्वादशाक्षरमन्त्रस्तु ततस्स्यात् षोडशाक्षरः ।
षडक्षरमतः पश्चात्तयोरे(त ए)काक्षरो मनुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टाक्षरमनुः पश्चात् विंशद्वर्णमनुस्तथा ।
अनुष्टुप् च ततः पश्चान्मालामन्त्रमतः परम् ॥
एवमष्टविधा मन्त्रा दत्तात्रेयस्य योगिनः ।
शीघ्रमिष्टार्थदातारः तत्रापि च कलौ युगे ॥
भोगी भवति योगी च चिरञ्जीवी च जायते ।
तन्मन्त्रं जापको मर्त्यः अणिमाद्यष्टसिद्धिमान् ॥

**End:**

न बाधते यन्त्रमन्त्रयन्त्रसिक्ताम्बुनाथ वा ।
बालग्रहादयस्सर्वे यन्त्रं दृष्ट्वा विनाशिताः ॥
निधिनिक्षेपसंरक्षोपसंरक्षा महाग्रहाः ।
फलायनमनुक्तं यत् तत्सर्वं द्वादशार्णवत् ॥

---

No. **7873.** दत्तात्रेयसन्ध्याविधिः.

DATTĀTRĒYASANDHYĀVIDHIḤ.

**Pages, 2.** Lines, 9 on a page.

Begins on fol. 8*b* of the MS. described under No. 586४.

Complete.

Deals with the method of offering the daily prayers, with Dattātrēya as the deity to be addressed instead of the Sun as in the ordinary daily prayers.

**Beginning:**

दत्तात्रेयसन्ध्याविधिः—

ओमिति बीजेन त्रिराचम्य, केशवादिस्थानेषु स्पृशेत् । बीजेन प्राणानायम्य, दत्तात्रेयसंध्यामुपासिष्ये । तदनन्तरं सङ्कल्प्य, मन्त्रन्यासं कृत्वा, त्रिवारं जप्त्वा, तीर्थे नाराचमुद्रया पूजायन्त्रं विलिख्य, यन्त्रं स्पृष्ट्वा,

ब्रह्माण्डोदरतीर्थानि करैस्स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देव(हि)दिवाकरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अनसूयामन्त्रेण अनसूयां तर्पयित्वा मूलमन्त्रेण देववदने तर्पणं कृत्वा आवरणदेवताभ्यो नमः, आरव(वरण)देवतास्तर्पयामि नमः, सर्वोपचारान् समर्पयामि नमः, दक्षिणहस्ते तीर्थमादाय त्रिवारं जप्त्वा पिबेत् । पुनरुपसंहृत्य दत्तात्रेयोऽहमस्मि इत्यनुसन्दधानः सन् यथेच्छं विहरेत् ॥

**Colophon:**

दत्तात्रेयसन्ध्या समाप्ता ॥

---

No. 7874. दशविधमन्त्रसंस्कारः.

DAŚAVIDHAMANTRASAṀSKĀRAḤ.

**Pages**, 2. **Lines**, 19 on a page.

Begins on fol. 4*b* of the MS. described under No. 2886. Complete.

This explains the ten kinds of rituals considered necessary for consecrating a Mantra with a view to make it effective.

**Beginning:**

मन्त्राणां दशकं वक्ष्ये संस्कारास्सिद्धिदायकाः ।
जननं जीवनं पश्चात् ताडनं बोधनन्तथा ॥
अथाभिषेको विमलीकरणाप्यायने यतः ।
तर्पणन्दीपनं गुप्तिर्दशैते(ता) मन्त्रसंस्क्रियाः ॥
मन्त्राणां मातृकामध्यादुद्धारो जीवनं स्मृतम् ।

**End:**

जप्यमानस्य मन्त्रस्य गोपनन्त्वप्रकाशनम् ।
संस्कारा दश संप्रोक्तास्सर्वमन्त्रेषु गोपिताः ॥

**Colophon:**

इति दशविधसंस्काराः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7875. दुर्गाप्रकरणम्.
## DURGĀPRAKARAṆAM.

**Pages, 9.** Lines, 10 on a page.

Begins on fol. 206*a* of the MS. described under No. 124.

This forms a portion of the Ākāśabhairavakalpa and contains the first three Upadēśas completely and the 4th incompletely. Treats of the Mantras addressed to the several manifestations of Durgā.

**Beginning:**

ततो रक्षाम्बिके दुर्गां सर्वातीतवरक्रमाम् ।
चराचरमयीं देवीं सर्वकामफलप्रदाम् ॥

* * * *

विविक्ता विविधा दुर्गा वीरमाहेश शूलिनी ।
तासां तु शूलिनी दुर्गा महाकारेति कीर्तिता ॥
अथवा सम्प्रवक्ष्यामि स्वात्मना करणेच्छया ।
अग्निदुर्गा महादुर्गा जलदुर्गा च नामतः ॥
पश्चात्तु शूलिनी दुर्गा [महाक्रूरे] अपवर्गविशेषतः ।
समाहितमना भूत्वा शृणु सर्वं वरानना(ने) ॥

**End:**

मनुः—

ओं नमः ह्रीं दुं ज्वल ज्वल शूलिनि त्वमिह पाहि भस्मां(स्मनामां) सदा समस्तरिपुदुष्टग्रह हुं फट् ॥

---

## No. 7876. दूतीयजनमन्त्रप्रयोगः.
## DŪTĪYAJANAMANTRAPRAYŌGAḤ.

**Pages, 69.** Lines, 8 on a page.

Begins on fol. 84*a* of the MS. described under No. 675

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Describes the manner in which the follwers of Śaktism should worship the women selected for the purpose of Śakti-worship. The idea seems to be that such a woman acts as a grace-seeking mediator between the worshipper and Dēvī.

**Beginning:**

आत्मपूजानन्तरं शिरसा श्रीगुरुं प्रणम्य--

देवनाथ गुरो स्वामिन् देशिक स्वात्मनाधिकम् ।
अनुज्ञान्देहि भगवन् त्वं दूतीयजनाय मे ॥

इति गुर्वाज्ञामादाय--

सर्वलक्षणसंपन्नां ब्रह्मविद्यादिदीक्षिताम् ।

दूतीः प्रातर्निमन्त्रितां सादरं स्वयं गत्वा प्रणम्य समाहूय पूजास्थाने मृद्वासने समुपवेश्य तस्य पादौ प्रक्षाल्य तां प्रणम्य कृताञ्जलिस्सन् भगवतीश्रीपरदेवतायजनार्थं त्वं दूती भूत्वा कृतार्थं मां कुरु इति प्रार्थ्य स्वासने उपविश्य कृताञ्जलिः ओं ऐं ह्रीं श्रीं ।

**End:**

अथ(त) ऊर्ध्वं न पूज्या स्यादित्याज्ञा परमेश्वरी ।
पूजिता चेद्वरारोहे तर्पणं निष्फलं भवेत् ॥
अर्चनेषु प्रयोक्तव्याः कामिन्यो भक्तचेतसः ।
सा यदा रजसा युक्ता तदा पूजा महाफलम् ॥
आत्मीयां च परां चैव पुष्पवन्तीं(युक्तां) प्रपूजयेत् ।
तत्र द्वेषपरो मूर्खो दारिद्र्यं समवाप्नुयात् ॥
अथ पूजाफलं वक्ष्ये उत्तरादुत्तरोत्तरम् ।

---

## No. 7877. देवीसन्ध्यावन्दनविधिः.
## DĒVĪSANDHYĀVANDANAVIDHIḤ.

**Pages**, 4. Lines, 16 on a page.

Begins on fol. 57*a* of the MS. described under **No. 424**.

Complete.

453-A

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Deals with the manner of offering the daily prayers with a view to please Dēvī.

**Beginning:**

अथ प्रातस्सन्ध्याविधिः—

ऐं आत्मतत्त्वं स्वधा, क्लीं विद्यातत्त्वं स्वधा, सौः शिवतत्त्वं स्वधा—इत्याचम्य, बालया प्राणानायम्य, न्यासं कृत्वा, वामकरे जलं निक्षिप्य, लं वं रं यं हं इति पञ्चभूबीजैर्जलं विशोध्य, बिन्दुमुद्रायां त्रिपुरवागीश्वरीश्रीपादुकां पूजयामि इति मार्जनत्रयं कृत्वा शिष्टं जलमिडया आकृष्य पिङ्गलया विरेच्य आधारचतुर्दशमण्डले वाग्भवं तटिद्वर्णं ध्यात्वा बहिराकाशस्थाग्निमण्डले समावाह्य तदुद्भवां सन्ध्यां देवीं ध्यायेत् ।

**End:**

एवं ध्यात्वा ऐं क्लीं सौः त्रिपुरसुन्दरि विद्महे कामेश्वरि धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥ यथाशक्ति जपं कुर्यादिति सन्ध्याविधिः ॥

---

## No. 7878. द्वादशारयन्त्रलक्षणम्.

## DVĀDAŚĀRAYANTRALAKṢAṆAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 188*a* of the MS. described under No. 119.

Complete.

Describes a form of the mystic diagram containing twelve compartments.

**Beginning:**

द्वादशारं लिखेत् पद्मं नववृत्तसमन्वितम् ।
तन्मध्ये कर्णिकां कुर्यात् द्वादशाङ्गुलिविस्तृतम् ॥
पञ्चाङ्गुलप्रमाणेन भ्रामयेत्प्रतिपङ्क्तितः ।

**End:**

कृष्णवर्णेन मतिमान् अक्षराणि न्यसेत्ततः ।
दलेष्वक्षरविन्यासो मन्त्राङ्गानि परिभ्रमात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7879. धारणगोपालविधिः.
## DHĀRAṆAGŌPĀLAVIDHIḤ.

**Pages**, 5. Lines, 16 on a page.

Begins on fol. 1*b* of the MS. described under No. 424.

Complete.

Gives the manner of offering prayers daily with a view to please Dhāraṇagōpāla, i.e., Śrī Kriṣṇa conceived as lifting up the Gōvardhana hill.

**Beginning:**

धारणस्य गोपालसन्ध्या । प्रत्यहं दिनादौ क्लीं कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् । इति कामगायत्र्या प्राणानायम्य मन्त्रन्यासपूर्वकं तथैव त्रिः संप्रोक्ष्य ॥

**End:**

ककुद्मंसे च हृत्पूर्वे पाणिपादतलेषु च ॥
जठरासनयोश्चैव स्थानान्यथा(यथास्थानं) क्रमान्न्यसेत् ।
ततः केशवादिन्यासान् कुर्यात् ततो मन्त्रन्यासः ॥

---

## No. 7880. धूपाञ्जनविधिः.
## DHŪPĀÑJANAVIDHIḤ.

**Pages**, 4. Lines, 8 on a page.

Begins on fol. 136*a* of the MS. described under No. 2848, wherein this is mentioned as Dūmāñjanavidhāna in the list of other works.

Incomplete.

Describes the manner of producing certain kinds of fume and of preparing certain kinds of unguent used for the purpose of driving away evil spirits from any person.

It is stated that certain incantations should be repeated during the process of picking out the herbs necessary to prepare the unguent, etc.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

चराचरमये जगत्यखिललोकरोगापहं
परामृतचिरोदितं विविधधूपदिव्याञ्जनम् ।
अशेषविधविग्रहग्रहविकारशान्तिप्रदं
सुखाय कथयामि तच्छृणु निबोधमन्विच्छता ॥

* * * *

धूपश्चतुर्विधः प्रोक्तो दीपधूपोऽग्निधूपकः ।
सार्द्रकोऽनार्द्रकश्चेति सर्वबाधानिवृत्तये ॥

**End:**

निम्बतैलेन संसिच्य धूपयेन्नाशयेत्रचहम् ।
मुक्तयेत् क्षुद्रसम्भूतान् सु-२-भमरु . . कान्(?) ॥

---

No. **7881.** धूमावतीकल्पः.
DHŪMĀVATĪKALPAḤ.

**Pages, 2.** Lines, 9 on a page.

Begins on fol. 47*a* of the MS. described under No. 21 and not on fol. 65*a* as shown therein.

Complete.

Deals with the details connected with the repetition of the Dhūmāvatīmantra—*vide* No. 6447 as to the powers of the Mantra.

**Beginning:**

ईश्वर उवाच—

धूमावत्या महादेव्या नारसिंह ऋषिस्तथा ।
पङ्क्तिश्छन्दस्तथा देवी ज्येष्ठा देवी च देवता ॥
धूं बीजं तु ततश्शाक्तिः स्वाहायोगस्तु निग्रहे ।

**End:**

अन्योन्यकलहः क्षिप्रं शत्रूणां जायते ध्रुवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विलोमेन जपेनैव निवृत्तिस्स्यात्सहस्रशः ॥
नान्यमन्त्रे निवृत्तिस्स्यात्प्रयत्नेन कृतेऽम्बिके ॥

---

## No. 7882. धूमावतीयन्त्रम्.
## DHŪMĀVATĪYANTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 45*a* of the MS. described under No. 2886 wherein this has been omitted to be shown among the other works.

Complete.

Deals with the Yantra relating to the Dhūmāvatīmantra.

**Beginning:**

धूमावत्याः नारसिंहः, पाङ्कः, . . . . . . . .
ध्यायन् कालाभ्र ।

प्रथमं धूं समुच्चार्य पश्चाद्धूमावती तथा ।
स्वाहेति मन्त्ररूपं तु सप्ताक्षरमुदीरितम् ॥

**End:**

ऋतुकोणस्थवृत्तान्तबीजं कोणे मनुं लिखेत् ।
कोणाग्रशूलके साध्यं ज्येष्ठायन्त्रमिहोच्यते ॥

---

## No. 7883. धूम्रवाराहीमन्त्रकल्पः.
## DHŪMRAVĀRĀHĪMANTRAKALPAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 5787.

Complete.

This is taken from Kālamṛtyutantra in Kālarātryāgama.

On the details connected with the repetition of the Dhūmravārāhīmantra which is considered to have the power of destroying one's enemies or of subjecting them to dire diseases such as epilepsy, etc.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

मृत्युधूमे अङ्गुष्ठ, धूं धूं कालधूमे तर्जनी, धूं धूं मध्यमाभ्यां, नमः धूम्रवाराहि अनामिका, हुं फट् कनिष्ठिका, स्वाहा करतलकर-पृष्ठ, ओं धूं धूं मृत्युधूमे हृदयाय नमः, धूं धूं कालधूमे शिरसे स्वाहा.

* * * *

अथ ध्यानं प्रवक्ष्यामि वाराहीधूम्रसौम्यकम् ।
ध्यानेन सिद्धिमाप्नोति चिन्तितां रिपुनाशनम् ॥
नमस्ते धूम्रवाराहि वैरिप्राणापहारिणि ।

**End:**

त्रिसप्तमूलमन्त्रेण मन्त्रयित्वा तु भौमके ॥
स्थापयेच्छत्रुगेहे तु जपेदष्टसहस्रकम् ।
काकवङ्कमते शत्रुरपस्मारेण संयुतः ॥

**Colophon:**

इति कालमृत्युतन्त्रे कालराज्यागमे उत्तराथर्वणास्त्रविद्या नाम द्वा-विंशः पटलः समाप्तः ॥

---

## No. 7884. धूम्रवाराहीमन्त्रोद्धारः.

## DHŪMRAVĀRĀHĪMANTRŌDDHĀRAḤ.

**Pages, 5.** Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 5864.

Complete.

On the order in which the syllables constituting the **Mantra** should be repeated.

**Beginning:**

नवरत्नप्रियां देवीं नानालङ्कारभूषिताम् ।
नमामि शत्रुनाशार्थं वैरिमारणकारिणीम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पार्वत्युवाच—

कालरुद्र नमस्तुभ्यं कलाधर नमोऽस्तु ते ।
अधुना धूम्रवाराह्या मन्त्रयोगं वद प्रभो ॥

ईश्वर उवाच—

कालमृत्युभयं मन्त्रं प्राणिप्राणापहारकम् ।
मारणास्त्रमिदं देवि सर्वमन्त्रेषु गोपितम् ॥

* * * *

धूं पूर्वं धूम्रशब्दं च वाराहीतिपदं वदेत् ।
हुंफट् स्वाहासमायुक्तं धूम्रवाराहिकामनुः ॥
चतुर्विंशतिवर्णोऽयं मन्त्रराजेश्वरेश्वरः ।
कालमृत्युरृषिः प्रोक्तः बृहती छन्द एव च ॥

**End:**

न वक्तव्यं न वक्तव्यं न वक्तव्यं कदा चन ।
शिष्यपापं गुरोर्देवि निश्चितं स्मृतिचोदितम् ॥

**Colophon:**

इति श्रीकालमृत्युतन्त्रे कालरात्र्यागमे उत्तराथर्वणविद्या नाम एकविंश[ति]: पटलः ॥

---

No. **7885.** नवग्रहकल्पः.

NAVAGRAHAKALPAḤ.

**Page**, 1. Lines, 8 on a page.

Begins on fol. 9*b* of the MS. described under No. **6459**.

Incomplete.

Gives particulars as to the kind of fuel to be used in the conduct of the fire-oblation in respect of the Navagrahas, and the **Mantras**, etc., to be used in the conduct of the worship.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

अर्कसमिधमादित्याय, पलाशं सोमाय, खादिरमङ्गारकाय, अपामार्गं बुधाय ।

**End :**

बृहशु(च्छु)क्र(श)शनिस्सूर्यः त्रिष्टुप्छन्दसि मध्यमम्(:) ।
बुधेर(धस्त्व)नुष्टुप्छन्दस्यए(प्ये)तच्छन्दस्य(सि) लक्षणम् ॥

---

No. **7886.** नवग्रहयन्त्रः.

NAVAGRAHAYANTRAḤ.

**Pages,** 6. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 2854.

Complete.

On the method of drawing the Yantra relating **to the Nava-grahamantra.**

**Beginning :**

ईश्वर उवाच—

पूर्वरेखा दश प्रोक्ताः तिर्यग्रेखास्तथा दश ।
चन्द्रमावसुकोणेषु ग्रहयन्त्रं लिखेद्बुधः ॥
पूर्वपश्चिमवेधाश्च वेधाश्चोत्तरदक्षिणे ।
अग्नि[र्वा](वा)यव्य[द्व](दि)ग्वेधो नैरृतीशान्ययोस्तथा ॥
चतुष्कोणेषु नवसु नवकोष्ठेषु दृश्यते ।

**End :**

मध्येवर्तुलमण्डलेऽनलयमेशार्क्ष(र्थे)शदेवेश्वर-
प्राचेतासुरवायुदिक्षु दिवसाधीशादिखेटान् क्रमात् ।
पश्चादीशदिगादिपद्मपरितो राशीन् वृषादीन् ततो
मेषान्ताननलाद्युद्धानि च दिगीशान्तान् क्रमेणार्चयेत् ॥

**Colophon :**

नवग्रहयन्त्रम् ईशान्यादि समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7887. नवदुर्गापद्धतिः.
## NAVADURGĀPADDHATIḤ.

Pages, 4. Lines, 20 on a page.

Begins on fol. 49*a* of the MS. described under No. 2961 and forms a portion of Bhairavayāmala shown among the other works given therein.

Complete.

On the manner of repeating the Mantra addressed to Navadurgā. This Mantra is believed to have the power of bringing other persons under one's control.

**Beginning:**

पुनरेकं प्रवक्ष्यामि कालिकाकर्षणं मनुः ।
प्रस्तं कृत्वा साध्यनाम सहस्रं रविवासरे ॥
निशाकाले जपेद्धीमानेकान्ते स्वस्तिकासने ।
नारीश्च स्वप्रियं वाथ पुरुषाकर्षणं भवेत् ॥

**End:**

भक्षणीयं प्रयत्नेन मोहनं द्रावकं भवेत् ।
मन्त्रितश्चैव तिलकं कृत्वा दर्शनमेव च ॥
स्त्रियो वा पुरुषो वाथ दर्शनात्तिलकस्य च ।
मोहनं गृह्यते लोके अत्याश्चर्यकरं तथा ॥

**Colophon:**

इति भैरवयामळे उमामहेश्वरसंवादे नवदुर्गापद्धतिः संपूर्णा ॥

---

## No. 7888. नवरत्नमुद्रिका.
## NAVARATNAMUDRIKĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 5660.

Complete.

Gives two methods of winning the favour of the Navagrahas. It is stated that the supplicant should wear a ring which

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



is set in a prescribed order with the several kinds of precious stones generally associated with the Navagrahas, the propitiatory Mantras being repeated while the stones are being set; or the supplicant may mentally dedicate to the Navagrahas an imaginary ring conceived to be set with the letters of the alphabet divided into nine groups corresponding to the nine kinds of precious stones.

**Beginning:**

श्रीसूर्यादिनवग्रहेभ्यो नमः ।

नवग्रहाधारः । अथ मातृकायां नवरत्नग्रहाणि नववर्गकाणि सकललोकान् नयति(न्ति) कर्तृन् सङ्ग्रहेण उपदेक्ष्यामः—

विभजेन्मातृका यन्त्री नववर्गान् यथाक्रमम् ।
कळाः स्वरान् तथा स्पर्शान् कादिपञ्च यशान्ततः ॥

* * * *

सूर्येन्दुभौमज्ञगुरुभृगुमन्दाहिकेतवः ।
माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः ॥

पुष्यरागं कनद्वज्रं नीलं गोमेधकं शुभम् ।
वैडूर्यं नव रत्नानि मुद्रान्ते कारयेत् सुधीः ॥

**End:**

इत्थं सूर्यस्य प्रागादिप्रादक्षिण्यक्रमेण नवरत्नखचितमुद्रिकां सकलमनोरथसिद्धये नवग्रहरत्नमुद्रिकां धारयेत् । मुद्रिकाद्वयकलाभिर्विहितः नवग्रहानुग्रहार्थं मातृनववर्गजातनवग्रहाणां मन्त्राणामुपासकानामभीष्टसिद्धये । सूर्यन्ते—

आभा, कामा, गया, चारा, बुला, टव, डषं, णश ।
तसं, दाह, नळं, पक्षा इत्येते मुद्रालक्षणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7889. नवरात्रीकल्पः.
## NAVARĀTRĪKALPAḤ.

**Pages,** 5. Lines, 16 on a page.

Begins on fol. 81*b* of the MS. described under No. 7739.

Complete.

On the method of the ceremonial repetition of Mantras during the festival called Navarātrī or Daśarā with a view to make them efficacious.

**Beginning :**

पार्वत्युवाच—

त्रिपुरान्तक सर्वेश त्रिकालज्ञानसागर ।
नवरात्रिपुरश्चर्याप्रयोगं वद शङ्कर ॥

* * * *

तत्प्रयोगं प्रवक्ष्यामि शृणु सर्वं च पार्वति ।
शुक्लप्रतिपदारभ्य तन्नवम्यां समापयेत् ॥
एकोत्तरसमृद्धिश्च तन्नवम्यां जपेत्सुधीः ।

**End :**

नवरात्रिपुरश्चर्या एवं विधिकृता यदि ।
सर्वान् कामानवाप्नोति दैवतैरपि दुर्लभान् ॥

* * * *

शिवरूपो विष्णुरूपो देवीरूपो न संशयः ।
जीवन्मुक्तस्स पूतात्मा कालीब्रह्ममयो भवेत् ॥

---

## No. 7890. नागार्जुनयन्त्रः.
## NĀGĀRJUNAYANTRAḤ.

**Page,** 1. Lines, 8 on a page.

Begins on fol. 188*a* of the MS. described under No. 119.

Gives the Ślōka containing the syllables to be written in the Yantra relating to the Nāgārjunamantra.

**Beginning** and **End :**

नागार्जुनयन्त्रश्लोकः—

नानारसतुलानाना नानाजाये वशे नना ।
एकैकह्निमिष्टार्थमेकादश कटक्रमात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7891. नाथपारायणकारिका.

## NĀTHAPĀRĀYAṆAKĀRIKĀ.

**Page, 1.** Lines, 10 on a page.

Begins on fol. 56*a* of the MS. described under No. 5647, wherein this is shown as Mantrapārāyaṇakramaḥ.

Complete.

Gives a list of the several Gurus called Nāthas recognised in the Śākta religion. The list is intended to serve as a help in repeating the names of the Gurus as ordained in that religion.

**Beginning:**

प्रकाशश्च विमर्शश्च आनन्दो ज्ञानमेव च ।
सत्यः पूर्णस्स्वभावश्च प्रतिभा सुभगा नव ॥

ततो मूलविद्यां प्रातरित्थं जपेत् । तद्यथा—

**End:**

प्राणायामत्रयमृष्यादिकरषडङ्गन्यासं च विधाय कृतं जपं देव्यै निवेद्य प्रणम्य स्तुत्वा सूर्यमण्डलाद्वह्निमण्डलाच्च मूलदेवीं वाग्भवेश्वरीं च हृदये मूलाधारे च विसृज्य श्रीगुरुं प्रणमेत् ॥

**Colophon:**

इति नाथपारायणजपः ॥

---

## No. 7892. नामपारायणम्.

## NĀMAPĀRĀYAṆAM.

**Pages, 4.** Lines, 7 on a page.

Begins on fol. 173*b* of the MS. described under No. 745, and not on 170*a* as shown therein.

On the method of repeating the names of Dēvī as consisting of the letters of the alphabet.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

एवं सन्ध्याचतुष्टयं विद्योपासकानामावश्यकं तदङ्गमन्त्रपारायणम् । नामपारायणन्तु प्रातरादि पुनः प्रातरन्तं जपेत् । तत्रादौ साधको विविक्तदेशे नदीतीरे एकान्ते स्वगृहे वा स्वासने समास्थितं ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य ।

**End:**

सर्वेषु दिनेषु सम्भूय षट्त्रिंशदुत्तरसप्तशताधिकएकविंशतिसहस्रनामपारायणजपो भवति । ततः मूलमन्त्रैर्जपदेनां गुरुपादुकाभक्तितः उत्तीर्णप्रार्थनाविद्यां च सकृत् सकृज्जप्त्वा पारायणस्तोत्रं पठेत् ॥

**Colophon :**

इति नामपारायणस्समाप्तः ॥

---

No. **7893.** नामपारायणविधिः.

NĀMAPĀRĀYAṆAVIDHIḤ.

**Pages, 4.** Lines, 6 on a page.

Begins on fol. 79*b* of the MS. described under No. 3472, wherein this has been omitted to be shown among the other works.

Complete.

Subject : same as the above.

**Beginning :**

नामपारायणं कुर्यात् । तत्क्रमः—

नद्यां स्वगृहे वा आसनमास्तीर्य ह्रीं आधारशक्तिकमलासनायै नमः इत्युपविश्य गुरुगणपतिस्वेष्टदेवताः प्रणम्य प्राणायामपूर्वकं सङ्क्षेपतो भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृका विन्यस्य कालचक्रन्यासं कुर्यात् ।

**End :**

अथ तत्तद्दिनवर्गमपि जपित्वा अनन्तरं तन्मासस्वरादारभ्य विसर्गान्तं जपित्वा अकारादितन्मासस्वरपर्यन्तं जपित्वा तत्सूक्तं जपेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति नामपारायणविधिः ॥

---

No. 7894. नारसिंहीमन्त्रः.

NĀRASIṀHĪMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 2854.

Complete.

71st Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of the **Mantra** addressed to Nārasiṁhī, one of the forms of Śakti.

**Beginning :**

श्रीशिव उवाच—

नारासिंहस्य मन्त्रस्य ऋषिस्सौरतरस्स्मृतः ।
छन्दः पङ्क्तिस्तथा देवी नारसिंही तु देवता ॥
रं बीजमथ फट्छक्तिः सर्वोच्चाटे नियोगकम् ।

* * * *

अश्वाधिरूढामतिभीमगात्रीमरातिवर्गानभिघातयन्तीम् ।
शिलाविभङ्गैर्विविधैः कुशाभिर्नमामि घोरां वरदां नृसिंहीम् ॥

**End :**

समस्तारिपुमुच्चाटयोच्चाटय स्वाहा ।
शरभेश्वरचक्रे तु क्रमान्मन्त्रं विलिख्य तु ॥
मध्यकोष्टद्वये वायुन्तत्रावाह्य यजेत्ततः ।
सहस्रं प्रजपेन्नित्यं पश्चाद्धान्निशि साधकः ॥
ग्रावाण(भि)पीडितश्शत्रुः क्षीणभोग्यो मृतप्रजाः ॥
दशाहाद्बन्धुभिस्सार्धं देशान्तरगतो भवेत् ॥

**Colophon :**

इत्याकाशभैरवकल्पे नारसिंहीमन्त्रो नाम एकसप्ततितमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7895. निकुम्बिलायागकल्पः.
## NIKUMBILĀYĀGAKALPAḤ.

**Pages**, 20. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4567.

Contains Paṭalas 1 to 5 ; 6th incomplete.

On the details connected with the repetition of the Pratyaṅgirāmantra. The Mantra derives the other name herein given from the fact that Indrajit used this Mantra in the sacrificial ceremony which he conducted at Nikumbilā with the object of defeating Rāma and Lakṣmaṇa.

The following are the subjects dealt with in the various Paṭalas :—

१. अङ्गिराप्राशस्त्यम्.
२. राजदोषपरिहारः.
३. प्रत्यङ्गिराजपेतिहासः.
४. पापपरिहारोपायकथनम्.
५. आथर्वणजपविधिः.
६. शत्रुपलायनम्.

**Beginning:**

देवदेव महादेव सर्वज्ञ जगदीश्वर ।
केनोपायेन . . . . विविधापदि ॥
सामन्तराजपीडासु विषशस्त्राग्निपातने ।
परप्रयोगपीडासु सिंहव्याघ्रभयादिके ॥

* * * *

दुर्गावैनायकौ मन्त्रै सिध्येते तु कलौ युगे ।
ताभ्यामप्यङ्गिरायास्तु मन्त्रश्शीघ्रेण सिध्यति ॥
तस्मादिमं मनुं लोके ये जपन्ति नरोत्तमाः ।
तेषां जगत्त्रयीरक्षा शान्तिस्सञ्जायते जपात् ॥

**End:**

ब्राह्मणेभ्यो ददात्येव दक्षिणाश्च ददाति वै ।
एवं कृतं चेद्भूपाल सर्वत्र विजयो भवेत् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति निकुम्भिलायागकल्पे मन्त्ररहस्ये चतुर्थपटलः ॥

* * * *

भूतप्रेतपिशाचादिशिलाय(लयाय) ह्रीं विशेषतः ।
नान्यदेतत्समानं स्यात्परकृत्याप्रशान्तये ॥

---

No. **7896.** नित्यपारायणजपक्रमः.

NITYAPĀRĀYAṆAJAPAKRAMAḤ.

Pages, 24. Lines, 29 on a page.

Begins on fol. 1*a* of the MS. described under No. 5507.

Complete.

Deals with the details connected with the daily worship to be conducted in relation to Dēvī.

Treats of the following subjects:—

१. प्रातस्सन्ध्याविधिः.
२. माध्याह्नसन्ध्याविधिः.
३. सायंसन्ध्याविधिः.
४. तुर्यसन्ध्याविधिः.
५. कालनित्याविद्या.
६. कालचक्ररचनाक्रमः.
७. नाथपारायणकारिका.
८. तत्त्वपारायणजपः.
९. नित्यापारायणम्.
१०. मन्त्रपारायणप्रकारः.
११. मन्त्रपारायणोद्धारः.

**Beginning:**

सा चतुर्विधा प्रातर्मध्याह्नसायाह्नार्धरात्रभेदात् । तथाचोक्तं त्रिपुरार्णवे—

सन्ध्या चतुर्विधा ज्ञेया बाला कौमारयौवना ।
प्रौढा च निष्कला चेति सन्ध्यादेव्यः प्रकीर्तिताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रातःकाले महादेवी विद्या वागीश्वरी मता ।
कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी ॥
मध्यरात्रे महादेवी ज्ञेया त्रिपुरसुन्दरी । इति ।

तत्र विधिवदाचम्य मूलविद्यया शिखां बद्ध्वा तयैव प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकरषडङ्गन्यासान्तं कृत्वा स्वपुरतो धेनुमुद्रया जलममृतीकृत्य मूलविद्ययाष्टवारमभिमन्त्र्य तेन जलेन कुशैरकारादिक्ष-कारान्तैस्सबिन्दुभिः मातृकाक्षरैः प्रोक्ष्य मूलविद्यया च त्रिः प्रोक्ष्य ।

**End:**

तारं त्रिवारं भुवनं श्रियं मूलं ततः परम् ।
पूर्वोक्तबीजत्रितयमेकैकं प्रथमं पठेत् ॥
मातृकाक्षरमेकैकं शुद्धबिन्द्वादिभेदतः ।
कालच्यादिनाम्नामेकैकं सम्बुद्ध्यन्तं समुद्धरेत् ।
ततश्शक्त्यादिविद्यानामेकैकं पुरतो वदेत् ।
एवं क्रमेण कथितो मन्त्रस्सर्वसमृद्धिदः ॥
षष्टिस्सहस्राणि तथा सहस्रं द्विशताधिकम् ।
पारायणक्रमो ह्येषां मन्त्राणां कथितश्शुभः ॥

इति मन्त्रपारायणोद्धारः ॥

**Colophon:**

इति पारायणोद्धारबीजपारायणक्रमः समाप्तः ॥

---

No. **7897.** नित्यापारायणम्.

NITYĀPĀRĀYAṆAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 57*a* of the MS. described under No. 5647, and forms a part of Mantrapārāyaṇakrama shown among the other works therein.

Complete.

Deals with the method of repeating the Mantras relating to the sixteen Nityas, who are the different manifestations of Śakti.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथ नित्यापारायणम् ।

सायमाज्ञासरोजस्थां शतचन्द्रसमद्युतिम् ।
शक्तिबीजात्मिकां चापबाणपाशाङ्कुशान्विताम् ॥
युगनित्याक्षरां देवीं घटिकावरणाम्बिकाम् ।
चिन्तयित्वा भगवतीं नित्याभिः परिवारिताम् ॥

* * * *

इति ध्यात्वा मूदिननित्याहं सः अं कामेश्वरीनित्यामन्त्रमुच्चार्य कामेश्वरीनित्यारूपिणीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि ।

**End:**

इति षोडशानित्याह क्रमेण विद्यात्मकत्वेन जपित्वा यापयेत् ॥

**Colophon:**

इति नित्यापारायणजपप्रकारः ॥

---

No. **7898.** निधिप्रदीपिका.

NIDHIPRADĪPIKĀ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 101*b* of the MS. described under No. 5417, and not on fol. 101*a* as shown therein.

Complete.

Forms the 20th and the 21st Paṭalas of Siddhanāgārjunatantra. On the Mantras and recipes considered to be efficacious in enabling one to find out hidden treasures.

**Beginning:**

ज्ञानानन्दमयं देवं श्रीमहोग्रनृकेसरिम् (?) ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥
निधिप्रदीपकं प्रोक्तं ग्रन्थं श्रीकण्ठशम्भुना ।
क्रियते सारवत्सारं सिद्धशाबरतन्त्रयोः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ वक्ष्ये महासिद्ध्यै नोक्तानि(क्तं हि) निखिलक्षणम् ।
सहायशोभनाकार्ये सप्त पञ्च त्रयोऽपि वा ॥
न सहायं न कर्तव्यं मन्त्राणां सिद्धिसाधनम् ॥
तत्रादौ लक्षणं वक्ष्ये सहायस्य समाहितः ॥

**End:**

ओं रक्ष स्वाहा—इति कालकर्णमन्त्रः ।
अथो पुष्पं ततो जाजी श्वेतार्कगिरिमल्लिका ।
वक्त्रे निक्षिप्य कबलं छिद्रं पश्यति मेदिनी ॥

**Colophon:**

इति श्रीसिद्धनागार्जुनतन्त्रे नागार्जुनसिद्धविरचिते एकविंशतिपटलः ॥

---

No. **7899.** नीलकण्ठत्र्यक्षरकल्पः.

NĪLAKAṆṬHATRYAKṢARAKALPAḤ.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 39. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is: Sāṅkhyāyanatantra 21*a*.

Adhyāyas 1 to 11 complete.

On the details connected with the repetition of Nīlakaṇṭhamantra which consists of three syllables and is addressed to Nīlakaṇṭha or Śiva. The repetition of the Mantra is considered to have the power of removing the effect of poison and to ward off untimely death caused by epilepsy, etc.

**Beginning:**

वसिष्ठ उवाच—

देवदेव महादेव शिव सर्वज्ञ शङ्कर ।
केनोपायेन वै जन्तुः मुच्यते मृत्युसङ्कटात् ॥
रोगाद्वा विविधैः क्रूरैर्भूतापस्मारमारकैः ।
ग्रहैर्वान्यैर्महाघोरैः देवदैत्योपकारकैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महानागे दुष्टसङ्घे विषहालाहलादिभिः।
अन्यैश्च विविधैर्भूतैराभिचारादिभिः कृतैः ॥
परैरुत्पादितैर्घोरैः कृत्यै रोगैरुपद्रवैः।
मृत्युपाशादिभिश्चान्यैः मुच्यते केन शङ्कर ॥

ईश्वर उवाच—

शृणु गुह्यतमं विप्र शुचिराचम्य वाग्यतः।
यस्य विज्ञानमात्रेण मृत्युं जग्या(जीया)त् सुदुर्जयम् ॥
महात्मकं महामन्त्रं सर्वोपद्रवनाशनम्।
त्र्यक्षरं त्रिपदाद्यन्तं त्रिकालज्ञानहेतुकम् ॥
वक्ष्ये तं मुनिशार्दूल मन्त्रोद्धारादिकं क्रमात्।
देवेश करुणासिन्धो मन्त्रस्यास्य महाद्युते ॥
ऋष्यादिमुद्राध्यानं च क्रमं चाख्यातुमर्हसि।
देवर्षिस्त्वरुणः प्रोक्तस्त्रिष्टुप् छन्द उदाहृतः ॥
देवताहं महारुद्रो नीलकण्ठ इति स्मृतः।
बीजं त्रिवृत्समाख्यातं मन्त्राद्यं शक्तिरुच्यते ॥
द्वितीयं कीलकं प्रोक्तं सर्वत्वे विनियुज्यते।

**End:**

एवं कृते भवेत्सिद्धिर्वसिष्ठ जपतां वर ॥
पृष्टे सेवाविधिश्चो(धौ चो)क्ते मया ते ब्रह्मनन्दन।
किं पुनस्तव चाख्येयं तत्पूजस्व वदाम्यहम् ॥

**Colophon:**

इति परमरहस्ये सञ्जीविनीविद्यायां पूर्वसेवाविधिर्नाम एकादशोऽध्यायः ॥

इति श्रीनीलकण्ठत्र्यक्षरीकल्पस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7900. नीलकण्ठत्र्यक्षरकल्पः.

## NĪLAKAṆṬHATRYAKṢARAKALPAḤ.

**Pages**, 27. Lines, 28 on a page.

Begins on fol. 150*b* of the MS. described under No. 7748.

Similar to the above. The eleventh Adhyāya is however different from the corresponding one in the MS. described above.

Does not contain the 10th Adhyāya.

१. मन्त्रोद्धारणम्.
२. ध्यानप्रकारः.
३. विनियोगप्रकारः विषादिमन्त्रप्रयोगश्च.
४. भूतशान्तिप्रकरणम्.
५. गर्भरक्षाकरप्रयोगः.
६. उन्मादापस्मारहरणम्.
७. षट्कर्मप्रयोगः.
८. शान्तिहोमविधिः.
९. देवतार्चनाविधिः.
११. सञ्जीविनीमन्त्रोद्धारः.

See under the previous number for the beginning.

**End**:

नीलकण्ठाखिलेशान महाहालाहलाशन ।
मुञ्च मामाशु महतो मृत्युपाशाद्दयानिधे ॥
इयं सञ्जीविनी नाम सर्वाभीष्टप्रदायिनी ।
नास्तिकायातिदुष्टाय न देयं यस्य कस्य चित् ॥
इदमायुष्करं पुण्यं सर्वारिष्टविनाशनम् ।
सर्वसौभाग्यदं नृणां सदा जप्यमिदं द्विज ॥

**Colophon**:

इति श्रीनीलकण्ठत्र्यक्षरविद्यायां परमरहस्ये सञ्जीविनीमन्त्रोद्धारं नामैकादशोऽध्यायः ॥

---

## No. 7901. नृसिंहमन्त्रोद्धारः.

## NṚSIṀHAMANTRŌDDHĀRAḤ.

**Pages**, 2. Lines, 9 on a page.

Begins on fol. 22*b* of the MS. described under No. 6090, and not on fol. 21*b* as shown therein.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The 8th Adhyāya of Atharvaṇarahasya.

On the order of arrangement of the syllables constituting the Narasiṁhamantra which is considered to have the power of neutralising the harmful effects of other Mantras.

**Beginning:**

श्रीलक्ष्मीरुवाच—

देवदेव महादेव नरसिंह जगत्पते ।
परमन्त्रनिवारः स्यात् केनोपायेन मे वद ॥

श्रीनृसिंह उवाच—

शृणु देवि प्रवक्ष्यामि मम मन्त्रमभीष्टदम् ।
ग्रहमारणमन्त्रं च जपेदावश्यकं प्रिये ॥
आदौ वेदादिमुच्चार्य नृसिंहं तारकं तथा ।
परमन्त्वप्रदं चैव प्रध्वंसनकरं परम् ॥
नृसिंहाय ततः पश्चात् वह्निजायेति उ(चो)द्धरेत् ।
षोडशाक्षरमन्त्रेण परमन्त्रविघातनम् ॥
ऋषिः कपिलविष्णुश्च छन्दोऽतिजगती तथा ।
नृसिंहो देवता चेति क्षकारं बीजमेव च ॥
वह्निश्शाक्तिस्ततश्चैव औकारं कीलकं तथा ।
सर्वापत्तारणं चेति विनियोगः प्रकीर्तितः ॥

**End:**

उग्रास्यं रक्तकेशं प्रलयशिखिनिभं सोमसूर्याग्निनेत्रं
द्वात्रिंशद्बाहुदण्डे दधतमसिगदाशङ्खचक्राब्जशार्ङ्गम् ।
कापालं ब्रह्मदण्डं हुतवहसदृशं प्रज्वलत्पावकाक्षं
क्षां क्ष्रीं क्ष्रौं बीजरूपं नरहरिवपुषः पातु मां नारसिंहम् ॥

* * * *

पलायन्ते यथा नागाः पक्षिराजस्य दर्शनात् ।
सत्यं सत्यं यथा सत्यं नृसिंहस्मरणं प्रिये ॥
गोपनीयं प्रयत्नेन सर्वकार्यार्थसिद्धिदम् ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इत्यथर्वणसारे स्तम्भोद्भवे मार्कण्डेयुनारदसंवादे श्रीनृसिंहमन्त्रोद्धारं नाम अष्टमोऽध्यायः संपूर्णः ॥

---

No. **7902.** नृसिंहयन्त्रः.

NṚSIṀHAYANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 3056.

Complete.

On the method of drawing the Yantra relating to the Narasiṁhamantra.

**Beginning:**

वृत्तं षट्कोणं पुनर्वृत्तम् अष्टदलमष्टकोणं वर्तुलं षोडशदलं वृत्तं तन्मध्ये नृसिंहबीजं तत्परितः ईशान्यादिचतुर्दिक्षु नेत्राक्षराणि इ ई उ ऊ तदधस्तात् धर्तुः इति त्र्यक्षरम् । आहत्य वृत्तमध्ये सप्ताक्षराणि ततः परं षट्कोणम् ।

**End:**

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नृसिंहः प्रचोदयात् । ततो वर्तुलं ततष्षोडशदलम् । एकस्मिन् दले द्वे अक्षरे, मालामन्त्रः,

उग्र वीर महावीर सर्वदैत्यनिबर्हण ।
सर्वत्र सर्वदा तिष्ठ दुष्टान्नाशय पाहि माम् ॥

**Colophon:**

इति नृसिंहयन्त्रस्समाप्तः ॥

---

No. **7903.** पञ्चचक्रविधानम्.

PAÑCACAKRAVIDHĀNAM.

Pages, 6. Lines, 15 on a page.

Begins on fol. 272*b* of the MS. described under No. 424, wherein this is shown as Pañcacakranirdēśa in the list of other works.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

Deals with the classification of the objects selected for worship by the Śāktēyas.

**Beginning**:

देवदेव महादेव सर्वविद्याविशारद ।
कौळिकानां हितार्थाय चक्रमेव वद प्रभो ॥

ईश्वर उवाच—

चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामळे ।
विधिना पूजयेच्चक्रं सौख्यमोक्षप्रदायकम् ॥
राजचक्रं महाचक्रं देवचक्रमथापरम् ।
वीरचक्रं चतुर्थं स्यात् पशुचक्रन्तु पञ्चमम् ॥

**End**:

या काचित्तिष्ठते चक्रे माता च भगिनी स्नुषा ।
दुहिता च तथा भार्या सर्वं माहेश्वरा(रेऽ)र्पयेत् ॥
महेश्वरो यदा भुक्ते(ङ्क्ते) मुक्तिः स्याद्देवादतः ।
तस्य संसर्गमात्रेण निर्वाणपदवी भवेत् ॥

**Colophon**:

इति श्रीरुद्रयामले उमामहेश्वरसंवादे पञ्चचक्रनिरूपणं नाम षष्ठ-[मो](ष्ठो)ऽध्यायः ॥

---

No. **7904**. पञ्चमुखहनुमद्यन्त्रोद्धारः.

PAÑCAMUKHAHANUMADYANTRŌDDHĀRAḤ.

Pages, 7. Lines, 18 on a page.

Begins on fol. 320*a* of the MS. described under No. 5477, and forms a portion of Mantramālikā included in the list of other works given thereunder.

Complete.

On the method of drawing the Yantra relating to the Pañcamukhahanumanmantra. At the end is given the method of

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



preparation of an unguent, which, when used as a *tilaka*, or forehead-mark is considered to have the power of enticing all people and making them spellbound.

**Beginning:**

हनुमद्यन्त्रम्—

प्रथमं वृत्तं तदुपरि त्रिकोणं तद्बहिर्वर्तुलं तदुपरि अष्टपत्रं . .

अथ यन्त्रं प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
आदौ यन्त्रं समालिख्य त्रिकोणं वर्तुलं भवेत् ॥
बहिरष्टदलं पश्चात्तद्बाह्ये द्वादशारकम् ।
षोडशारं ततः पश्चात् द्वात्रिंशद्दलसंयुतम् ॥

**End:**

विष्णुक्रान्तामच्छनीलीं श्वेतां च गिरिकर्णिकाम् ।
एषां मूलं समुद्धृत्य गोरोचनसमन्वितम् ॥
कन्याहस्तेन निष्पेष्य तिलकं तेन कारयेत् ।
त्रैलोक्यमोहनं चैतत् किमु लोकजनस्य वै ॥

**Colophon:**

इति पञ्चमुखहनुमत्कल्पं सम्पूर्णम् ॥

---

No. **7905.** पञ्चमुखहनूमद्यन्त्रोद्धारः.

PAÑCAMUKHAHANŪMADYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 18*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

**Beginning:**

अथ यन्त्रं प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टपत्रं समालिख्य तद्बाह्ये द्वादशारकम् ।
षोडशारन्ततः पश्चात् द्वात्रिंशद्दलमेव च ॥

**End:**

चतुष्षष्टिदलान्तेषु मालामन्त्रं लिखेत्क्रमात् ।
परितः शेषवर्णांश्च भूपुरेषु समालिखेत् ॥

हं हनूमते पञ्चमुखाय स्वाहा । सीतापतये रामाय हन हन हुं फट् स्वाहा ॥

---

## No. 7906. पञ्चमुखहनुमद्यन्त्रोद्धारः.

## PAÑCAMUKHAHANUMADYANTRŌDDHĀRAḤ

Pages, 3. Lines, 4 on a page.

Begins on fol. 141*a* of the MS. described under No. 29.

Complete.

Similar to the above. Contains also two lines in Telugu describing the appearance of the Yantra.

**Beginning:**

षट्कोणं वलयं चैव दशद्वयदलानि च ।
वृत्तद्वययुतत्रिंशच्छदानि पुरभूयुतम् ॥
पञ्चास्यहनुमन्ताख्यं(न्नाम) यन्त्रं विद्वेषनाशनम् ।

**End:**

इति विलिख्य तदुपरि भूमण्डलं विलिख्य प्रणवेन वेष्टा ॥

**Colophon:**

इति पञ्चमुखहनुमद्यन्त्रं संपूर्णम् ॥

---

## No. 7907. पञ्चाक्षरयन्त्रः.

## PAÑCĀKṢARAYANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 112*b* of the MS. described under No. 5683, and forms a portion of Pañcākṣarīvidyā shewn among the other works therein.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the method of drawing the Yantra relating to the Śiva-pañcākṣarīmantra.

**Beginning:**

अथ शैवकल्पान्तरोक्तयन्त्रमुच्यते--

तत्रादौ षट्कोणमण्डलं लिखित्वा तदन्तः साध्ययुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवशक्तिसहितान् पञ्चाक्षरवर्णान् कोणविवरेषु षडङ्गमन्त्रान् संलिख्य ।

**End:**

एतद्यन्त्रं जपहोमादिना पूजितं धारयेत् ।
आयुरारोग्यैश्वर्यसर्वसंपत्सर्वरक्षाभुक्तिमुक्तिफलानि भवन्ति ॥

---

No. **7908.** पञ्चाक्षरीमन्त्रविधानम्.

PAÑCĀKṢARĪMANTRAVIDHĀNAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 3680.

Complete.

On the arrangement of the syllables constituting the Śiva-pañcākṣarīmantra and on the manner of repeating it.

**Beginning:**

अथ वक्ष्ये महेशस्य मन्त्रान् सर्वसमृद्धिदान् ।
यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमञ्जसा ॥
हृदयं वपरं साक्षि लान्तो मान्तानितो मरुत् ।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥
वामदेवो मुनिश्छन्दः पङ्क्तिरीशोऽस्य देवता ।
षड्भिर्वर्णैः षडङ्गानि कुर्यान्मन्त्रस्य देशिकः ॥

**End:**

निर्मिता शङ्खमणिभिः कुरुते कीर्तिमक्षयाम् ।
गजदन्तैर्विरचिता माला स्यान्मुक्तये नृणाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **7909.** पञ्चाक्षरीविद्याकल्पः.

PAÑCĀKṢARĪVIDYĀKALPAḤ.

**Pages**, 14. Lines, 9 on a page.

Begins on fol. 106*a* of the MS. described under No. 5683.

Complete.

On the details connected with the worship of the Śiva-pañcākṣarīmantra.

**Beginning:**

अथ उक्तहृल्लेखाशक्तेः पार्वत्यात्मकत्वात् पार्वत्या मायाशबलितब्रह्मभूता . . . . . . . . , . . . शैवमन्त्रन्यासपूजाप्रकारोपेताः प्रकाश्यन्ते ।

तत्रादौ श्रीमच्छैवपञ्चाक्षरी विद्या निगद्यते । नमःशब्दश्चतुर्थ्यन्तशिवशब्दश्च पञ्चाक्षरी विद्या ।

**End:**

यत्किञ्चित्प्रार्थयेद्देवं जपेदयुतमादरात् ।
सर्वान् कामानवाप्नोति पुरुषो नात्र संशयः ॥

**Colophon:**

इति पञ्चाक्षरीविधानं सम्पूर्णम् ॥

---

No. **7910.** पराप्रासादमन्त्रोद्धारः.

PARĀPRĀSĀDAMANTRODDHĀRAḤ.

**Pages**, 14. Lines, 6 on a page.

Begins on fol. 137*a* of the MS. described under No. 673.

Complete. Forms a portion of Kulārṇava.

On the order of arrangement of the syllables constituting the Parāprāsādamantra; contains also the Nyāsa connected with the Mantra.

**Beginning:**

श्रीदेव्युवाच—

कुळश श्रोतुमिच्छामि श्रीप्रासादपरामनुम् ।
मन्त्रराजं वदेशान न्यासध्यानादिभिः सह ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
अस्य श्रवणमात्रेण निराकारः प्रजायते ॥

* * * *

श्रीप्रासादपरामन्त्रो भुक्तिमुक्तिफलप्रदः ।
पराप्रासादमन्त्रस्तु ह्रादिरुक्तः कुलेश्वरि ॥
प्रकाशानन्दरूपत्वात्प्रत्यक्षफलदानतः ।
प्रसन्नचित्तरम्यत्वात्प्रसिद्धार्थनिरूपणात् ॥
प्राक्तनाघप्रशमनात्प्रणतार्तिनिवारणात् ।
प्रासादकरणाच्छीघ्रं प्रासादमनुरीरितः ॥

**End:**

ऊर्ध्वाम्नायप्रयोगश्च पराप्रासादचिन्तनम् ।
महाषोढापरिज्ञानं नाल्पस्य तपसः फलम् ॥
इति ते कथितो मन्त्रोद्धारन्यासादिकं प्रिये ।
समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥

**Colophon:**

इति श्रीकुलार्णवे सर्वागमोत्तमे महारहस्ये श्रीप्रासादमन्त्रोद्धारन्यासकथनं नाम चतुर्थोल्लासः ॥

---

No. **7911.** पराशरसंहिता.
PARĀŚARASAṀHITĀ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 644. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Paṭalas 1 to 65.

The fols. 94 to 105, 193 to 199 and 202 to 208 are left unwritten. Corresponding to these portions, Paṭalas 25 (end), 26, 27, 28 (beginning), 54, 55, 56, 57 are wanting

The work treats of Hanumanmantra and is attributed to Parāśara.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Said to have been transcribed by Cinta Pēruśāstrin from the MS. of Gōvindappa Nāyaka, Raja of Cinnakōṭa, on Tuesday the 12th day of the bright fortnight in the month of Caitra in the year Saumya.

Contains the following Paṭalas :—

१. मन्त्रोपदेशलक्षणकथनम्.
२. पञ्चमुखहनुमन्मन्त्रोद्धारकथनम्.
३. हनुमन्मन्त्रमाहात्म्यम्.
४. आञ्जनेयस्तोत्रकथनम्.
५. सोमदत्तनीलचरित्रकथनम्.
६. हनुमज्जन्मकथनम्.
७. सुवर्चलाद्वादशाक्षरीप्रभावः.
८. ध्वजदत्तचरित्रकथनम्.
९. ध्वजदत्तचरित्रकथनम्.
१०. व्याधचरित्रकथनम्.
११. सुवर्चलाहनुमद्द्वादशाक्षरीमहिमानुवर्णनम्.
१२. सुवर्चलाद्वादशाक्षरीमहिमा.
१३. ध्वजदत्तचरित्रकथनम्.
१४. ध्वजदत्तचरित्रकथनम्.
१५. विजयचरित्रकथनम्.
१६. विजयचरित्रकथनम्.
१७. हनुमन्मन्त्रसन्ध्याविधिः.
१८. स्नानसन्ध्याप्रकारः.
१९. षट्पल्लवप्रयोगविधिः.
२०. कपिलचरित्रकथनम्.
२१. कपिलचरित्रकथनम्.
२२. कश्यपचरित्रकथनम्.
२३. हरिशर्मचरित्रकथनम्.
२४. सप्ताक्षरीमन्त्रप्रभावः.
२५. हनुमन्मालामन्त्रोद्धारः.
२६. मालामन्त्रकथनम्.
२७. पम्पासरोवर्णनम्.
२८. नारदहनुमत्संवादः.
२९. देवाश्वासनम्.
३०. त्रिशूलवधकामत्रिशूलवधप्रतीक्षणम्.
३१. त्रिशूलरोमवधः.
३२. हनुमत्प्रादुर्भावः.
३३. रक्तरोमवधः.
३४. सुमुखचरित्रकथनम्.
३५. मैन्दचरित्रकथनम्.
३६. हनुमन्मन्त्रान्तरोद्धारः.
३७. मालामन्त्रप्रभावः.
३८. यवनाश्वचरित्रकथनम्.
३९. हनुमद्विग्रहप्रतिष्ठाकथनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४०. हनुमद्विग्रहप्रतिष्ठाकथनम्.
४१. पर्वदिवसपूजाविधानम्.
४२. वीरहनुमन्मन्त्रप्रभावः.
४३. हनुमद्भक्तकथनम्.
४४. मैरावणमायाप्रकटनम्.
४५. पाताललङ्काप्रवेशकथनम्.
४६. हनुमद्वर्णनम्.
४७. मैरावणवधः.
४८. गरुडगर्वापहरणम्.
४९. हनुमत्पूजासाधनम्.
५०. भीमसेनचरित्रकथनम्.
५१. पुरुषमृगहरणोपायः.
५२. मानसिकपूजाविवरणम्.
५३. विश्वरूपदर्शनम्.
५४. भविष्यद्ब्रह्मभावकथनम्.
५५. मालास्तोत्रजपादिलक्षणम्.
५६. स्वप्नहनुमन्मन्त्रप्रभावः.
५७. मन्त्रसंस्कारविवेककथनम्.
५८. चक्रध्यानप्रकरणम्.
५९. श्रीविद्याप्रशंसनम्.
६०. आञ्जनेयावतारभक्तकथनम्.
६१. मुद्रालक्षणकथनम्.
६२. हनुमद्विग्रहप्रकारकथनम्.
६३. होमप्रकारकथनम्.
६४. राजाभिषेकप्रकारकथनम्.
६५. गजाश्वसंरक्षणाग्निजलस्तम्भनकथनम्.

**Beginning:**

श्रीजानकीपतिं रामं भ्रातृभिर्लक्ष्मणादिभिः ।
सहितं वरदं वन्दे रत्नसिंहासने स्थितम् ॥
एकदा सुखमासीनं पराशरमहामुनिम् ।
मैत्रेयः परिपप्रच्छ तपोनिधिमकल्मषम् ॥
भगवन् योगिनां श्रेष्ठ पराशर महामते ।
किञ्चिद्विज्ञातुकामोऽस्मि तन्ममानुग्रहं कुरु ॥

* * * *

न शीघ्रसिद्धिदा मन्त्राश्चिरकालफलप्रदाः ।
लक्ष्मीनारायणी विद्या भवानीशङ्करात्मिका ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीतारामभहाविद्या पञ्चवक्त्रहनूमतः ।
विद्या चतुर्थी संप्रोक्ता नृसिंहानुष्टुभाभिधा ॥

* * * *

**Colophon :**

इति श्रीपराशरसंहितायां पञ्चमुखहनुमन्मन्त्रविवरणे पराशरमैत्रेयसंवादे मन्त्रोपदेशलक्षणकथनं नाम प्रथमः पटलः ॥

**End :**

बलिप्रदानशीलस्सन् जपेन्मन्त्रं समाहितः ॥
जपेत सुचिरं कालमरोगी श्रीनिवासकः ।
पुष्पौघादिभिर्युक्तः महावंशप्रवर्तकः ॥

**Colophon :**

इति श्रीपराशरसंहितायां पञ्चमुखहनुमन्मन्त्रविवरणे पराशरमैत्रेयसंवादे गजाश्वसंरक्षणाग्निस्तम्भनजलस्तम्भनकथनं नाम पञ्चषष्टितमः पटलः ॥

---

## No. 7912. पराशरसंहिता.
## PARĀŚARASAṀHITĀ.

Substance, paper. Size, 12⅛ × 7⅞ inches. Pages, 339. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Ṣōḍaśyaṣṭōttaraśatanāmāni 171*b*, Tattvaprakāśikā (Stutisūktimālāvyākhyā) 181*a*.

Paṭalas 1 to 65.

Same as the above.

---

## No. 7913. पापशुद्धिप्रकारः.
## PĀPAŚUDDHIPRAKĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 14*a* of the MS. described under No. 2886.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This forms the 6th Paṭala in the Āñjanēyakalpa of the Sudarśanasaṁhitā.

The mere repetition of the Mantra relating to Āñjanēya unaccompanied by rituals is considered to have the power of removing certain kinds of sin.

**Beginning :**

पापशुद्धिमथो वक्ष्ये पूजाहोमौ तथा विना ।
स्मरणादेव मन्त्रस्य पापसंहारकारणम् ॥
सन्न्यासी च तपस्वी च गुरोराज्ञावलम्बकः ।
मन्त्रं गृहीत्वा विधिवत् जपेत्स सुसमाहितः ॥

**End :**

अपात्रदानस्वीकार्यै(रः)पुष्पिणीगमनं तथा ।
तत्पापं विलयं याति अष्टोत्तरशतेन च ॥

**Colophon :**

इति सुदर्शनसंहितायामाञ्जनेयकल्पे षष्ठः पटलः ॥

---

## No. 7914. पाशविमोचनमन्त्रः.
## PĀŚAVIMŌCANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 22*b* of the MS. described under No. 2854.

Complete. 55th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of the Pāśavimōcanamantra which is considered to have the power to extricate one from the three kinds of bondage known among the Śaivites as Mala, Māyā and Karma.

**Beginning :**

श्रीशिवः—

अथान्यं संप्रवक्ष्यामि मन्त्रं पाशविमोचनम् ।
पूर्ववद्दृष्टिभावादिमन्त्रभेद मि(इ)होच्यते ॥

455-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रथमन्तु विलोमेन व्याहृतिं प्रणवन्तथा ।
ध्रुवासुत्वेत्यृचं पश्चात् स्वरादिव्याहृतिन्तथा ॥

**End:**

अविश्वासो न कर्तव्यः कृते सर्वं विनश्यति ।
तस्मात्सर्वप्रयत्नेन जपेत्सिध्यति निश्चयः ॥

**Colophon:**

इत्याकाशभैरवकल्पे पाशविमोचनं नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥

---

## No. 7915. पाशुपतास्त्रमन्त्रोद्धारः.
## PĀŚUPATĀSTRAMANTRŌDDHĀRAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 21.

Complete.

On the order of arrangement of the syllables constituting the Pāśupatāstramantra.

**Beginning** and **End:**

अथ शैवपाशुपतमन्त्रोद्धारणक्रम उच्यते । श्रीगुरुवन्दनादिप्राणायामत्रयानन्तरं, स च शकारलकारचतुर्थस्वरबिन्द्वात्मकबीजात्मकः पशुपतये हुंफडितिवह्निजायायुक्तषडलान्तः । लद्दन्द्वान्तःप्रणवपूर्वकम् ॥

**Colophon:**

इति मन्त्रोद्धारक्रमः ॥

---

## No. 7916. पिण्डगोपालयन्त्रम्.
## PIṆḌAGŌPĀLAYANTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 140*b* of the MS. described under No. 5417.

Complete.

On the method of drawing the Yantra relating to the Piṇḍagōpālamantra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

आदौ षट्कोणं विलिख्य तन्मध्ये वर्तुलं वर्तुलमध्ये क्ष्रौं विलिखेत् । षट्कोणेषु क्लीं कृष्णाय स्वाहा—इति कृष्णषडक्षरं लिखेत् ।

**End :**

तद्बाह्ये वृत्तं क्रों--इति अङ्कुशबीजेन वेष्टयेत् ।
तद्बाह्ये वृत्तं सर्वेषु मन्त्रेषु प्रत्यक्षराणां बिन्दुं लिखेत् ॥

**Colophon :**

इति गोपालयन्त्रस्समाप्तः ॥

---

No. **7917.** पीताम्बरापद्धतिः.

PĪTĀMBARĀPADDHATIḤ.

Pages, 9. Lines, 16 on a page.

Begins on fol. 75*a* of the MS. described under No. 7739.

Complete ; forms a portion of Jayadrathayāmalātantra.

On the details connected with the repetition of the Mantra, which is addressed to the goddess Pītāmbarī, also known as Bagalā.

**Beginning :**

अस्य श्रीपीताम्बरिबगलामुखिकवचस्य महादेव ऋषिः, अनुष्टुप् छन्दः, नाम्नं वाचं छन्दः, श्रीबगलामुखी देवता . . . . .

तत्रादौ यन्त्रोद्धारणम्—

बिन्दुत्रिकोणषट्कोणमष्टारं च ततः परम् ।
षोडशारं ततो देवि ततो भूबीजमालिखेत् ॥

**End :**

आलिखेच्चतुरः पादनखाग्रतोऽथ समन्वितः ।
अन्योन्यमिलितत्वेन तत ऊर्ध्वं समन्विता ॥
वामपादस्य सन्धी द्वौ द्वौ पादौ परिकल्पयेत् ।
नामस्ति(नुक्ति)रस्य शाखा(नाशा)न्ता वाग्गतिस्तम्भनं परम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति जयद्रथयामलतन्त्रे भैरवकल्पे पीताम्बरापद्धतिस्समाप्तः ॥

---

No. **7918.** पीताम्वराबगलामुखीपद्धतिः.

PĪTĀMBARĀBAGALĀMUKHĪPADDHATIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 77*a* of the MS. described under No 235.

Complete.

Similar to the above.

**Beginning :**

अस्य श्रीपीताम्बरबगळामुखीमहामन्त्रस्य नारदभगवानृषिः, कालभैरवो वा ऋषिः, उष्णिक् छन्दः,

* * * *

अथार्चनक्रमः। प्रातरुत्थाय स्मरणादिकं कृत्वा बाह्यमभ्यन्तरे वाचं कृत्वा बालाबीजत्रयेण विद्यामायाशिवतत्त्वानि शोधयामि स्वाहा—इति प्रत्येकमुच्चार्याचम्य ओं ह्रीं श्रीं पक्षसेवाधिपतये माणिभद्राय कीलय कीलय स्वाहा—इति दन्तधावनं कृत्वा।

**End :**

अन्योन्यमिलितत्वेन तत ऊर्ध्वं समन्विता ॥
वामपाद(स्य)सन्धी द्वौ द्वौ पादौ परिकल्पयेत्।
नानुक्तिरस्य नाशान्ता वाग्गतिस्तम्भनं परम् ॥

**Colophon :**

इति जयद्रथयामळतन्त्रे भैरवकल्पे पीताम्बरापद्धतिः समाप्ता ॥

---

No. **7919.** पुरुषसूक्तयन्त्रोद्धारः.

PURUṢASŪKTAYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the method of drawing the mystical diagram in which the syllables of the Puruṣasūkta are written.

**Beginning:**

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनष(ड)र्णश्च षट्सु कोणेषु सन्धिषु ॥
तदङ्गानि चतुष्पत्रे केसरेषु क्रमेण च ।
गोपालकचतुर्वर्णान् मन्त्रस्यैकैकमक्षरम् ॥

**End:**

हैयङ्गवीने प्रविलिख्य यन्त्रं त्रिवारमेतत्प्रविजप्य सूक्तम ।
प्रातस्समद्याद्वनिता विदग्धं पुत्रं प्रसूते कमलाक्षतुल्यम् ॥

क्लीं कृष्ण क्लीं इति चतुर्वर्णः ओन्नमो भगवते सुदर्शनाय इति द्वादशार्णः ।

* * * *

ओन्नमो भगवते महासुदर्शनाय हुं फट् स्वाहा इति सुदर्शनद्यष्टवर्णः । एवं पुरुषसूक्तयन्त्रम् ॥

---

## No. 7920. पुरुषसूक्तविधानम्.

## PURUṢASŪKTAVIDHĀNAM

Pages, 6. Lines, 7 on a page.

Begins on fol. 157*b* of the MS. described under No. 7758.

Complete.

On the details connected with the repetition of the Puruṣasūktamantra.

**Beginning:**

स्नानादि विधिवत्कृत्वा देवार्चनगृहं व्रजेत् ।
स्थित्वा बाहिर्द्वारपालपूजां कुर्यात्समाहितः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूद्वासनयुतां रम्यां कर्णिकां पूजयेत्ततः ।
एवंविधासने विष्णुं श्रिया युक्तं प्रपूजयेत् ॥
पुरुषसूक्तस्य मन्त्रस्य ऋषिर्नारायणो भवेत् ।
पुरुषो देवतानुष्टुप्छन्दोऽस्यास्त्रिष्टुबुच्यते ॥
तारं नमो भगवते पुरुषाय हृदि न्यसेत् ।
मूर्ध्नि न्यसेत्तथैवोक्त्वा सहस्रशिरसे ततः ॥

**End:**

आह्वामन्त्रासनार्घ्ये पदसलिलमथाचामपुंसूक्तयुक्त—
स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादिः पर्क आदावुपरि च सलिलं पायसाद्यन्नजातं
ताम्बूलं राजपूजा परिणुतिनमनोद्वासनं विष्णुपूजा ॥

---

## No. 7921. पुरुषसूक्तश्रीसूक्तप्रयोगः.

## PURUṢASŪKTAŚRĪSŪKTAPRAYŌGAḤ.

Pages, 13. Lines, 15 on a page.

Begins on fol. 191*a* of the MS. described under No. 1197, wherein this is shown as Puruṣasūktahōma among the other works.

Complete.

On the details connected with the repetition of the Puruṣasūkta and Śrīsūkta, and also with the method of performing the fire-offering accompanied by the repetition of the Mantra.

**Beginning:**

अथ सन्तानयन्त्रप्रसङ्गात् यन्त्रसारोक्तं सन्तानकरं पुरुषसूक्तयन्त्रमपि लिख्यते ।

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनषडर्णश्च षट्सु कोणेषु सन्धिषु ॥

* * * *

सहस्रशीर्षेतिषोडशर्चस्य साध्यनारायण ऋषिः, अनुष्टुप् छन्दः, श्रीभगवान् पुरुषो देवता; ओं बीजं, नमः शक्तिः,

* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानसिकपञ्चोपचारान् कृत्वा न्यासप्रकारः ॥

* * * *

अथ श्रीसूक्तन्यासस्य आनन्दकर्दमचिक्लीतेन्दिरासुता ऋषयः,

* * * *

चरुं पुरुषसूक्तेन श्रपयेत् पुत्रकाम्यया । होममिति शेषः । अयं होमस्सन्तानार्थमेव भवति ;

हुत्वाग्नि विधिवद्भक्त्या ऋग्भिः षोडशभिर्बुधः ।
कृताञ्जलिपुटो भूत्वा स्तुवन्नाशीः प्रयोजयेत् ॥

**End :**

चतुर्दश्या बलिं कृत्वा पञ्चदश्या प्रदक्षिणम् ।
षोडश्योद्वासनङ्कुर्यात् शेषकर्माणि पूर्ववत् ॥

---

## No. 7922. प्रणवकल्पः.
## PRAṆAVAKALPAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 92*a* of the MS. described under No. 582.

Contains the 18th Paṭala of Prapañcasāra and the 7th Adhyāya of Vāsiṣṭha-Laiṅgōpapurāṇa.

On the details connected with the repetition of the Praṇava-mantra, Ōm, and of the manner of worshipping God with that Mantra.

**Beginning :**

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं
सजापमपि सार्चनं सहितक्लृप्ति सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥
आद्यस्वरस्समेतोऽम(श)रेण सधसप्तमश्च बिन्दुयुतः ।
प्रोक्तः स्यात् प्रणवमनुः त्रिमात्रिकस्सर्वमन्त्रसमवायी ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति प्रपञ्चसारे अष्टादशः पटलः ॥

**End :**

ओङ्कारेणैव पोतेन संसाराब्धिं तरेद्द्विजः ।
प्रणवेन प्रदीपेन स्वात्मानं ब्रह्म पश्यति ॥
वर्णाश्रमपरिभ्रष्टा ये नरा मूढचेतसः ।
तेऽपि पापार्णवं त्यक्त्वा ज्ञानं लब्ध्वा दिवं ययुः ॥
तस्मात्सर्वप्रयत्नेन सादरं सर्वदा मुने ।
अस्याभ्यासेन चात्मानमाश्रयान्यत्क्रमं त्यजेत् ॥

**Colophon :**

ओं इत्युपपुराणे वासिष्ठलैङ्गे सप्तमोऽध्यायः ॥

---

No. **7923.** प्रणवपञ्चाक्षरीयन्त्रम्.

PRAṆAVAPAÑCĀKṢARĪYANTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 174*a* of the MS. described under No. 5417.

Complete.

On the method of drawing the Yantra relating to the Śiva-Pañcākṣarīmantra which has the Praṇava prefixed to it.

**Beginning :**

आन्ध्रभाषारूपः प्रथमम् ।

**End :**

ओं ह्रौं शिवास्त्राय हुं फट् नमः, ओं क्लीं पशु हुं पाशुपतास्त्राय हुं फट् नमः, ओं छें छिं छुं छुरिकास्त्राय हुं फट् नमः, ओं ह्रौं अघोरास्त्राय हुं फट् नमः ॥

**Colophon :**

इति पञ्चाक्षरीयन्त्रस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7924. प्रणवमातृकाभुवनेश्वरीमन्त्रविधानम्.
## PRAṆAVAMĀTṚKĀBHUVANĒŚVARĪMANTRA-VIDHĀNAM.

Pages, 2. Lines, 11 on a page.

Begins on fol. 94*b* of the MS. described under No. 5683.

Incomplete.

On the significance and the method of repetition of the Praṇavamantra, Ōm, which is here taken to signify the identity of Ātman and Prakṛti. In this sense this Praṇava-mantra is called Bhuvanēśvarīmantra, as the universe is considered to have sprung from Prakṛti.

**Beginning:**

अथ सकलमन्त्रस्फूर्त्यापादकाः प्रणवमातृकाभुवनेश्वरीमन्त्रा उपासितव्या इति तेषामुपासनक्रमः कथ्यते ।

उक्तञ्च—प्रणवा मातृका देवी हृल्लेखीत्यमृतत्रयम् ।
विपिनं सर्वमन्त्राणामित्याह भगवान् शिवः ॥

**End:**

अहमिति सर्वसाक्षी प्रत्यगात्मा उच्यते । तयोस्सामानाधिकरण्येन ईशत्वमुक्तम् । अस्यार्थस्य स्पष्टतया वाचकः प्रथमः । अस्पष्टतया वाचको द्वितीय इति प्रथममन्त्रोऽवशिष्यते । उभयस्यापि महावाक्यार्थबोधकत्वमस्त्येव ॥

---

## No. 7925. प्रतापहनुमत्कल्पः.
## PRATĀPAHANUMATKALPAḤ.

Pages, 19. Lines, 17 on a page.

Begins on fol. 70*b* of the MS. described under No. 5755.

Complete.

Gives the order of arrangement of the syllables constituting the Pratāpahanumanmantra, and also other details connected with the repetition of the Mantra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following eight Paṭalas :—

| | |
|---|---|
| १. मन्त्रोद्धारविधिः. | ५. होमविधानम्. |
| २. मन्त्रजपविधानम्. | ६. नानाप्रयोगविधानम्. |
| ३. मन्त्रविधानम्. | ७. स्नानसन्ध्याविधिः. |
| ४. रोगशान्तिकरणम्. | ८. प्राणायामविधिः. |

**Beginning :**

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलभेदाय नमश्शान्ताय तेजसे ॥

* * * *

मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रमाहात्म्यमेव च ।
मन्त्रसङ्ग्रहणं चैव श्रूयतां कमलेक्षणे ॥
आदौ तु प्रणवो माया ओं नमो भगवते पदम् ।
ततः प्रकटसंयुक्तं ततः पराक्रमाय च ॥

**Colophon :**

इति श्रीसुदर्शनसंहितायां प्रतापहनुमन्मन्त्रोद्धारविधिर्नाम प्रथमः पटलः ॥

**End :**

प्राणायामत्रयं पूर्वं कृत्वा सर्वेषु कर्मसु ।
एतद्धनूमन्माहात्म्यं किं भूयश्श्रोतुमिच्छसि ॥

**Colophon :**

इति श्रीमत्सुदर्शनसंहितायां प्रतापहनुमन्मन्त्रविधानप्राणायामविधिः अष्टमः पटलः ॥

---

No. 7926. प्रत्यङ्गिराकल्पः.

PRATYAṄGIRĀKALPAḤ.

Pages, 41. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 4338.

This contains the Digbandhana, Kṛtyāsūkta and other details prescribed in relation to the use of Pratyaṅgirāmantra ; and is said

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



to be mainly extracted from the Mahālakṣmīratnakōśa, being the 60th, 68th and 70th chapters thereof.

**Beginning**:

अथर्वणभद्रकाली—

अस्य श्रीअथर्वणभद्रकालीमहामन्त्रस्य अङ्गिरा ऋषिः, गायत्री छन्दः, भद्रकाली देवता; क्षं बीजं, ह्रीं शक्तिः, फट् कीलकं,

खट् फट् जहि महाकृत्ये विधूमाग्निसमप्रभे ।
देवि देवि महादेवि मम शत्रून् विनाशय ॥

* * * *

अनन्तरं दिग्बन्धनमन्त्रप्रारम्भः—

तयोर्मे पुरस्तात् पावकेनेह कर्मणा । इन्द्रस्तं देवो राजा जम्भयतु जृम्भयतु स्तम्भयतु नाशयतु मोहयतु शोषयतु दाहयतु साधयतु ध्वंसयतु ।

**End**:

सर्वापमृत्युनिवारणं भवति । सर्वग्रहदोषा नश्यन्ति । वन्ध्या पुत्रं लभते । सती तीर्थमयीं सा विष्णुपदीं प्राप्नोति सरक्तमङ्गुलीयकं दद्यात् ॥

**Colophon**:

इति प्रत्यङ्गिराकल्पस्समाप्तः ॥

---

## No. 7927. प्रत्यङ्गिराकल्पः.

## PRATYAṄGIRĀKALPAḤ.

Pages, 50. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 4567, and not on fol. 25*a* as shown therein.

Complete.

On the details connected with the repetition of the Pratyaṅgirāmantra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

देवदेव महादेव सर्वज्ञ जगदीश्वर ।
प्रत्यङ्गिरारहस्यं च ब्रूहि मे वद शङ्कर ॥

* * * *

अहं ते कथयिष्यामि शृणु पार्वति सुव्रते ।
त्वयोक्तानां क्रिया लोके प्रोक्तः प्रत्यङ्गिरामनुः ॥

**End:**

ये द्रुह्वादजवो मह्यं मम्रक दायीय दुर्मदा । आविध्यैतान् शोचिषाविध्य तान् वैवस्वतस्य सदनं यमस्य ॥

**Colophon:**

अङ्गिराऋचस्समाप्ताः ॥

---

## No. 7928. प्रत्यङ्गिराकल्पः.

## PRATYAṄGIRĀKALPAḤ.

Pages, 79. Lines 25 on a page.

Begins on fol. 84*a* of the MS. described under No. 2961.

Complete.

Similar to the above.

**Beginning:**

यां कल्पयन्तीत्यसौ ऋषिः, कृत्यानुष्टुप्, शीर्षन्वा(ण्व)तीत्यग्निः, कृत्यानुष्टुप्, व(ये)नधिष्ठे(दिष्टे)हाभिवर्तस्वेत्य(न)योर्विष्णुः, कृत्या गायत्री, यस्त्वाकृत्ये दूर्वासः, कृत्यानुष्टुप् क्षिप्रं कृत्ये महादेवः, कृत्यानुष्टुप् ।

**End:**

मन्त्रेण करहृदयन्यासः । ध्यानम् । प्रत्यङ्गिराऋक्समुदायस्य नवसहस्रजपः । आद्येन दशांशहोमः । त्रिंशत्सहस्रं वा जपः ॥

---

## No. 7929. प्रत्यङ्गिराकल्पः.

## PRATYAṄGIRĀKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 14*b* of the MS. described under No. 21, where the work has been shown as beginning on fol. 25*b* in consequence

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



of blank fols in the MS. having been taken into account in calculating the number of fols.

Complete.

Similar to the above.

**Beginning:**

अथातः प्रत्यङ्गिराकल्पं व्याख्यास्यामः—

एतैरेव महापातकोपपातकेभ्यः प्रमुच्यते । एताभिरेव त्रिरात्रमुदुम्बरदण्डं पुरुषमात्रं धारयन् जपेत् । सर्वशत्रून् मारयति । एतेनैव विधानेन यक्षराक्षसभूतप्रेतपिशाचानपि मोहयेत् ।

**End:**

समाहितमना भूत्वा सहस्रं जपेत् । दीर्घायुर्भवति—इत्याह पैप्पलादयः ॥

**Colophon:**

इति प्रत्यङ्गिराकल्पः ॥

---

No. **7930.** प्रत्यङ्गिराप्रयोगः.

PRATYAṄGIRĀPRAYŌGAḤ.

Pages, 17. Lines, 16 on a page.

Begins on fol. 26*a* of the MS. described under No. 7739.

Complete.

Similar to the above.

**Beginning:**

अथ प्राथमिकं यन्त्रराजं वक्ष्ये यथाक्रमम् ।

अथ याङ्कत्रयम्—

अथ भूमन्दिरं लिख्य तद्बाहिर्भूगृहं लिखेत् ।
अन्तर्भूकोणकोणे च बाह्यकोणे लिखेत्क्रमात् ॥

**End:**

कार्पासबीजलवणैर्हुनेदष्टसहस्रकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूर्यविलोकनं कुर्वन् अष्टविंशतिसङ्ख्यया ।
जपेन्मन्त्री प्रसन्नात्मा वृष्टिस्तम्भो भवेद्ध्रुवम् ॥

---

No. 7931. प्रत्यङ्गिराप्रयोगपद्धतिः.

PRATYAṄGIRĀPRAYŌGAPADDHATIḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 45*b* of the MS. described under No. 124 and not on 45*a*, as shown therein.

Complete.

Similar to the above.

**Beginning:**

ब्राह्मे मुहूर्ते उत्थाय शौचादिकं निर्वर्त्य शुद्धवस्त्रं परिधाय भस्मस्नानं कृत्वा शुचिर्भूत्वा स्वासने उपविश्य सहस्रदलकमले स्वशिरसि गुरुं ध्यायेत् ।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
महागुरुपदाम्बुजं विमलगन्धपुष्पाक्षतम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि हंसकं तदभिधानपूर्वङ्गुरुम् ॥

एवं ध्यात्वा मानसोपचारैरुपचर्य गुरुपादुकामन्त्रं यथाशक्ति जपित्वा निवेद्य कमले इष्टदेवतां स्मृत्वा न्यासध्यानपूजान्तं विधाय ।

**End:**

अष्टोत्तरसहस्रन्तु जपेत्संयोज्य भैरवम् ।
मायाबहिश्च तद्यन्त्रं तापयेत्सितिवह्निना ॥
कामज्वरसमाक्रान्तामानयेत्साध्यकामिनीम् ।
निरुध्य यदि नायाति म्रियते नात्र संशयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7932. प्रत्याङ्गिरायन्त्रकल्पः.

## PRATYAṄGIRĀYANTRAKALPAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 16*b* of the MS. described under No. 21 wherein this has been shown as beginning on fol. 27*b*, certain blank leaves in the MS. having been taken into account.

Incomplete.

On the method of drawing the Yantra relating to the Pratyaṅgirāmantra.

**Beginning:**

बीजं मध्ये नृसिंहं प्रण भुवनाधीश्वरीबललिख्य
कोणं तं नारसिंहं[वि]लिखतु सृणिगुणैर्हुम्फडर्णे स्वबीजम् ।
ज्वालेत्यारभ्य वर्णान् विलिखतु गुणशः शेषमन्ते दलेषु
चाष्टस्वावीतवृत्तं तदुपरि वसुधाकोणमष्टत्रिशूलम् ॥

* * * *

अथ यन्त्रक्रमं वक्ष्ये चत्वारिंशद्दचामपि ।
गुह्याद्गुह्यतमं ज्ञेयं न देयं यस्य कस्य चित् ॥

**End:**

अन्तर्भूमन्दिरं लिख्य तद्बाहिर्भूगृहं लिखेत् ।
अन्तर्भूकोणकोणे च बाह्यकोणान्तिकक्रमात् ॥

---

## No. 7933. प्रत्यङ्गिरायन्त्रकल्पः.

## PRATYAṄGIRĀYANTRAKALPAḤ.

Pages, 16. Lines, 9 on a page.

Begins on fol. 37*a* of the MS. described under No. 124.

Complete.

Similar to the above.

**Beginning:**

. . . (अथ यन्त्रक्रमं वक्ष्ये) चत्वारिंशद्दचामपि ।
गुह्याद्गुह्यतमं ज्ञेयं न देयं यस्य कस्य चित् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अगस्त्य उवाच—

कीदृग्विधाय दातव्यं तन्नो ब्रूहि पितामह ।

पितामहः—

गुरुभक्तियुजे कर्मभीताये(या)स्तिकवृत्तये ॥

जितक्रोधाय दातव्यमधुना किमिहोच्यते ।

यन्त्रसङ्ग्रहणादेव क्षयं गच्छन्ति शत्रवः ॥

मन्त्रतन्त्रप्रयोगाश्च वक्ष्यन्ते क्रमशो मुने ।

याङ्कल्पयन्तीत्यस्य

अथ प्राथमिकं यन्त्रराजं वक्ष्ये यथाक्रमम् ॥

**End:**

नमो निरङ्कुशैश्वर्यगुणायागण्यशक्तये ।

हेरम्बायाम्बिकेयाय विघ्नसङ्घातघातिने ॥

सहस्राराम्बुजारूढं कोटिसोमार्कसन्निभम् ।

सत्यानृतानन्दपदं भुक्तिमुक्तिप्रदं भवेत् ॥

श्रीमन्नाथपदद्वन्द्वपद्मं शिरसि संदधे ।

पापच्छेदक्षयं हंसवर्णयुक्तस्वरूपिणि ॥

प्रत्यङ्गिरामनोन्यासध्यानपूजादिकक्रमः ।

संप्रदायानुसारेण संक्षेपाल्लिखितं मया ॥

---

No. **7934.** प्रत्याङ्गिरायन्त्रोद्धारः.

PRATYAṄGIRĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 57*b* of the MS. described under No. 4338.

Similar to the above.

**Beginning:**

वृत्तं षट्कोणमालिख्य मध्ये बीजं नृसिंहकम् ।

साध्यादिमन्त्रन्यासांश्च[तत्रैव]विलिखेद्दतुकोणके ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृसिंहबीजमुल्लिख्य तच्चतुर्दिक्षु पाशकम् ।
हुम्फट् क्रों इति चालिख्य ततोऽष्टदलमालिखेत् ॥
तद्दलेषु ऋचां वर्णान् चतुरश्चतुरो लिखेत् ।
दलाग्रेषु च मन्त्रार्णान् क्रमेण विलिखेद्बुधः ॥

**End:**

आलिख्य यन्त्रमेतत्तु धारयेद्यो यथाविधि ।
कृत्यादिभयनिर्मुक्तः स जीवेच्छरदां शतम् ॥

---

## No. 7935. प्रत्यङ्गिरायन्त्रोद्धारः.
## PRATYAṄGIRĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 24*b* of the MS. described under No. 4338.

Similar to the above.

**Beginning:**

अथ यन्त्रोद्धारः—

त्रिकोणवेदपत्राष्टपत्रषोडशपत्रके ।
भूपुरेण युते यन्त्रे प्रदद्यान्मायया सह ॥
आग्नेयकोणत्रितये शिववाराहमाधवान् ।
अर्चयेत् स्वस्वमन्त्रैस्तु प्रोच्यन्ते मनवस्तु ते ॥
प्रणवो मनुचन्द्राद्यं गगनं हृदयं शिवाम् ।
मारुतश्शिवमन्त्रोऽयं सप्तार्णशिवपूजने ॥

**End:**

इत्थं जपादिभिस्सिद्धे मन्त्रेऽस्मिन् धनसञ्चयैः ।
कुबेरसदृशो मन्त्री जायते धनवन्दितः ॥

**Colophon:**

इति प्रत्यङ्गिरायन्त्रं संपूर्णम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **7936.** प्रत्यङ्गिरासूक्तप्रयोगः.

PRATYAṄGIRĀSŪKTAPRAYŌGAḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 71*b* of the MS. described under No. 7739.

Complete.

On the details connected with the repetition of the Pratyaṅgirā hymn; at the end a few stanzas relating to the Pratyaṅgirā-yantra are added.

**Beginning:**

अस्य श्रीप्रत्यङ्गिरासूक्तमन्त्रस्य द्वात्रिंशदृचामनुष्टुप् छन्दः, अव ब्रह्मेत्येकपदा गायत्री, यो न इति त्रिष्टुप्, प्रत्यृचं कृत्या देवता, कालाग्निरुद्रस्य महादेवः कृत्या वा ।

**End:**

त्रिकोणमादौ संलिख्य तद्बाह्ये वर्तुलं लिखेत् ।
तस्मिन्नष्टदलं पद्मं तद्बाह्ये तु महीगृहम् ॥
मूलमन्त्रस्य वर्णानां चतुष्कं प्रतिपत्रके ।
तद्यन्त्रं धारयेद्धीमान् सर्वकर्मसु साधनम् ॥

ओं शान्तिश्शान्तिश्शान्तिः ॥

---

No. **7937.** प्रत्याङ्गिरासूक्तप्रयोगः.

PRATYAṄGIRĀSŪKTAPRAYŌGAḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 3491.

Incomplete.

Similar to the above.

**Beginning:**

यथा विद्युदग्निः रुद्रः पङ्क्तिः यथा प्रतिशुक्रेत्यादित्यस्तवः परमात्मानुष्टुप् यो नस्त्वो अरणो इति गायत्री . . . . . . . .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दन्तधावनमादौ तु स्ना(क्र)त्वाचम्य यथाविधि ।
आपो हि ष्ठा हिरण्येति पवमानेति चात्मनः ॥

**End:**

कृत्यानुष्टुप्, असपत्नं पुनस्त्वं नः दानवः, अभय(यं)विष्णुर्गायत्री परि(राहि)कुत्येमा उष्णिक् कश्यपो बृहती, अभ्यक्ताक्ता अथ वो वायुरनुष्टुप्, एवं त्वमग्निः कुत्यानुष्टुप् ब्रह्मा वसवः.

---

## No. 7938. प्रत्यङ्गिरासूक्तव्याख्यानम्.
## PRATYAṄGIRĀSŪKTAVYĀKHYĀNAM.

Pages, 14. Lines, 11 on a page.

Begins on fol. 25*a* of the MS. described under No. 4567.

Incomplete.

This is a commentary on the Pratyaṅgirāsūkta which consists of thirty Vedic Ṛks in praise of Pratyaṅgirā.

**Beginning:**

यां कल्पयन्ति = यां देवतां स्वभा(वा)दप्रेरितां परे कल्पयन्ति = अस्मद्बाधनव्यापारसमर्थां कुर्वन्ति जपहोमध्यानैरुत्पादयन्तीत्यर्थः ।

नोऽरयः शत्रवः । क्रूरामुग्रां शत्रुबाधनयोग्यामाकारेण । स्त्रियमिव तां ब्रह्मणापनिर्णुद्मः येनोत्पादितासि मज्जिघांसया तां ब्रह्म(णा) ब्रह्म वेदो ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतामिति प्रयोगात् वेदेन मन्त्रलक्षणेन निर्णुद्मः निकृष्येतोऽन्यत्र प्रेरयामः ।

**End:**

अस्यास्मद्रिपोः किमपि वस्तुजातं मोच्छिषः नोच्छोषयसि । द्विपदं द्विपद्वर्गं पुरुषानाय्यादि मनुष्यजातं मोत किञ्चिच्चतुष्पदम् । उतशब्दः अपद्य किञ्चित् द्विचतुष्पादजातम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7939. प्रपञ्चसारविवरणम्.
## PRAPAÑCASĀRAVIVARAṆAM.

Pages, 212. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 6667.

Contains Paṭalas 1 to 22 and 24 to 35. Breaks off in the 36th Paṭala, and wants beginning and end for the 24th and 22nd Paṭalas, respectively.

This is a commentary on the Prapañcasāra, which is a work by Śaṅkarācārya dealing with Mantras, Yantras, Prayōgas, etc., occurring in the various Āgamas.

The subjects dealt with herein are given below :—

१. गर्भवासक्रमकथनम्.
२. वर्णनिष्पत्तिकथनम्.
३. ४. मन्त्राणां विश्वयोनित्वकथनम्.
५. ६. साङ्गोपाङ्गदीक्षा.
७. मातृकाविधानम्.
८. प्राणाग्निहोत्रादिकथनम्
९. त्रैपुरमन्त्रप्रशंसा.
१०. भुवनेश्वरीमन्त्रः.
११. द्वादशगुणितविधानम्.
१२. श्रीमन्त्रनिरूपणम्.
१३. क्रियाशक्तिप्रधानमन्त्रभेदः.
१४. दुर्गाविधानम्.
१५, १६. त्रिगुणात्मकसूर्यादिमन्त्रः.
१७. गणेशमन्त्रः.
१८. काममन्त्रः.
१९. मोक्षमन्त्रः.
२०. अष्टाक्षरविधिः.
२१. अष्टाक्षरविधानभेदः.
२२. द्वादशाक्षरविधानम्.
२४. वराहविधानम्.
२५. नृसिंहाविधानम्.
२६. विष्णुपञ्जरविधिः.
२७. शैवविधानम्.
२८. दक्षिणोर्ध्ववक्त्रादिशैवमन्त्रः.
२९. दक्षिणोर्ध्ववक्त्रादिशैवमन्त्रः.
३०. गायत्रीविधानम्.
३१. आग्नेयमन्त्रः.
३२. लवणमन्त्रः.
३३. प्रणवशक्तिप्रासादयोगादिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३४. नानाविधमन्त्रविशेषविधिः.

३५. प्राणप्रतिष्ठामन्त्रः.

३६. पुत्रोत्पत्तिकरप्रयोगविशेषः.

**Beginning:**

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्योऽपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तस्स्वयमेकाकी संपदा लज्जमानो दुःखी कृतजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसङ्ग्रहप्रपञ्चागमसारसङ्ग्रहरूपं ग्रन्थञ्चिकीर्षुरभिमतसकलप्रयोजनसिद्धये प्रथमतः परदेवतातत्त्वानुस्मरणमाशीर्लक्षणञ्च मङ्गलमाचरन् ग्रन्थादौ औपयिकं विषयादिकमप्यर्थात्सूचयति—अकचटतपयाद्यैरित्यादिना । शारदा वश्चेतसः परिशुद्धिं वितरत्वित्यन्वयः । चित्तादिसङ्घातव्यतिरिक्तायाश्शारदायास्सत्त्वे सिद्धे संभवतीयमाशीः ।

* * * *

**Colophon:**

इति प्रपञ्चसारविवरणे प्रथमः पटलः ॥

**End:**

अष्टदलगभुक्तौ साध्यादिकमालिख्य पाशाङ्कुशान्तां संवेष्टच याद्यष्टकमष्टदलेषु लिखित्वा अवशिष्टेन बहिस्संवेष्टच भूपुरद्वये पाशाङ्कुशौ लिखेदिति—यन्त्रविधिः ।

**Colophon:**

इति श्रीप्रपञ्चसारविवरणे पञ्चत्रिंशत्पटलः ॥

उक्तमन्त्रानुष्ठानयोगपुत्रोत्पत्तिकरं प्रयोगविशेषं वक्तुमारभते—अथ सन्तानेति । न केवलं

* * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्गुरुर्मातामहः तत्पितृद्वयं मातुःपितामहमातुःप्रपितामहलक्षणम् । एवं पितृणां पङ्कनवकं हुत्वा देवभागेन देवहोमः कर्तव्य इत्याह— कलायुतैरिति ॥

---

## No. 7940. प्रपञ्चसारसङ्ग्रहः.

## PRAPAÑCASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 19 × 1⅝ inches. Pages, 180. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

To the end of Śrīvidyāpañcadaśākṣarīnyāsavidhi.

Incomplete.

A work containing the essence of the Prapañcasāra of Śaṅkarācārya; by Girvāṇēndra, a disciple of Viśvēśvarasarasvatī who was a disciple of Amarēndrasarasvatī. It is stated by the author that the Mantras, Tantras and Yantras dealt with in Sanatkumārīya, Mantrakalpāntara, Mantrasārakramadīpikā, Śāradātilaka, Mantradēvatāprakāśikā, etc., have been included in this work, and that the composition is planned after the commentary called Satsampradāyasarvasva.

**Beginning:**

नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसङ्ग्रहमुत्तमम् ॥

तत्र प्रपञ्चसारे यद्यच्छङ्कराचार्यैरुक्तं मन्त्रयन्त्रप्रयोगादि तत्सर्वमपि सारभूतमेव तथापीदानीं मन्दप्रज्ञानां विस्तरशो ज्ञातुमनुष्ठातुञ्चाशक्यत्वादत्यन्तोपकारभूतत्वेन तत्सारतरन्तदल्पग्रन्थेनैव यथा सर्वमन्त्रयन्त्रतन्त्रसारग्रहणं स्यात् तथा सर्वतस्सारं गृहीत्वा मया सत्संप्रदायसर्वस्वाभिधव्याख्यानोक्तमार्गेण वक्ष्यते । तत्र पुनः प्रसङ्गात् तत्र तत्र मन्त्रकल्पान्तरे मन्त्रसारक्रमदीपिकासनत्कुमारीयशारदातिलकमन्त्रदेवताप्रकाशिकादौ यद्यन्मन्त्रतन्त्रयन्त्राद्युक्तं तदपि किञ्चित्किञ्चिद्वक्ष्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र प्रपञ्चसारे प्रथमं तावत् क्षीराब्धौ शेषपर्यङ्कशायिनं महाविष्णुं प्रति ब्रह्मादिभिः त्रिभिः मूर्तिभिः स्वेषामुत्पत्त्यादिविषयः प्रश्नप्रकारः प्रथमे पटले निरूपितः ।

See under the next number for the end.

---

No. **7941.** प्रपञ्चसारसङ्ग्रहः.

PRAPAÑCASĀRASAṄGRAHAḤ.

**Substance, paper. Size, $12\frac{3}{8} \times 7\frac{1}{4}$ inches. Pages, 501. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, old.**

Begins on fol. 1*a*. The other works herein are Prapañcasāra-saṅgrahaśēṣa 251*b*, Sudarśanasaṁhitā 266*a*, Śaivasiddhāntarahasya 267*b*, Prapañcasārasaṅgrahasūcī 271*b*.

Complete.

Same subject as in the above.

See under the previous number for the beginning.

**End :**

रम्यमप्युज्वलमपि मनसोऽपि समीप्सितम् ।
लोकविद्वेषणं वेषं न गृह्णीयात् कदाचन ॥
इत्याचारपरस्सम्यगाचार्यं सम्यगर्चयेत् ।
कृतकृत्यस्स वै शिष्यः परत्रेह च नन्दति ॥

**Colophon :**

इति श्रीप्रपञ्चसारसङ्ग्रहे द्वात्रिंशः पटलः ॥ समाप्तश्च ॥

---

No. **7942.** प्रपञ्चसारसङ्ग्रहः.

PRAPAÑCASĀRASAṄGRAHAḤ.

**Pages, 64. Lines, 19 on a page.**

Begins on fol. 81*a* of the MS. described under No. 2886.

Incomplete.

Contains Paṭalas 24 to 32.

Same as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 7943. प्रपञ्चसारसङ्ग्रहः.
## PRAPAÑCASĀRASAṄGRAHAḤ.

Pages, 45. Lines, 21 on a page.

Begins on fol. 364*a* of the MS. described under No. 1800.

Incomplete.

Same as the above.

---

## No. 7944. प्रपञ्चसारसङ्ग्रहशेषः.
## PRAPAÑCASĀRASAṄGRAHAŚĒṢAḤ.

Pages, 14. Lines, 18 on a page.

Begins on fol. 122*b* of the MS. described under No. 2886, wherein this has been omitted to be shown in the list of other works.

Complete.

A supplement to the work entitled Prapañcasārasaṅgraha described above giving details of procedure regarding certain Mantras not dealt with in the Prapañcasārasaṅgraha.

**Beginning:**

अथ प्रपञ्चसारसङ्ग्रहोक्तमन्त्रप्रसङ्गात् अन्येऽपि केचिन्मन्त्रा लिख्यन्ते—

गृत्समद ऋषिः, त्रिष्टुप् छन्दः, रुद्रो देवता । मा त्वा रुद्र शुक्राधा मा नमोभिः इत्यृक् ज्वरशान्तिकृत् ।

**End:**

आकाशशशिभ्यां बिन्द्वर्धचन्द्राभ्यां संयुतं सिद्ध्यै इति स्वरूपम् । हृदयं नमः पदं ह्रीं सिद्ध्यै नम इति मन्त्रस्वरूपम् ॥

इत्यक्षमालाजपविधिः ॥

इति प्रपञ्चसारसङ्ग्रहमन्त्रप्रसङ्गात् लिखितमन्त्राः समाप्ताः ॥

आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं तथा ॥
बहिरष्टदलं पद्मं ततः पार्थिवमण्डलम् ।
तद्बाह्ये भूपुरद्वन्द्वं वज्रकोणसमन्वितम् ॥

**End:**

तद्दलेषु रामदूताय नमः, वायुपुत्राय नमः, अञ्जनागर्भसुताय नमः—इति लिखेत् । तदुपरि आवर्तं लिखेत् ।

भूकोणचतुष्कोणेषु त्रीन् त्रीन् प्रणवान् विलिखेत् ।
भूकोण आवर्तमध्ये एकाक्षरान् विलिखेत् ।
लं रं वं शं षं यं सं यं अं विलिखेत् ॥

**Colophon:**

यन्त्रचक्रोद्धारस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8051. यन्त्रोद्धारप्रकारः.
## YANTRŌDDHĀRAPRAKĀRAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 84*a* of the MS. described under No. 139.

Complete.

On the order of arranging the syllables of the Rāmamantra in the Yantra relating thereto.

**Beginning:**

आदौ षट्कोणमालिख्य वृत्तरेखात्रयं लिखेत् । तदुपरि केसरसहितस्याष्ट दलानि विरचय्य पुनः वृत्तत्रयं कृत्वा पुनः पूर्ववद्दलानि विलिख्य पुनः पूर्ववद्वृत्तपूर्वकं केसराणि द्वादश दलानि विलिख्य पुनः पूर्ववद्वृत्तपूर्वकं केसराणि षोडश दलानि विलिख्य पुनः वृत्तपूर्वकं सकेसराणि द्वात्रिंशद्दलानि विलिख्य ततो भूगृहं विलिखेत् । तत् कथम्? चतुरश्रं रेखात्रयसमन्वितं द्वारोपेतं वज्रशूलाढ्यं मेषराश्यादि वल्ल्यादिविभूषितं फणिसंयुतम् ।

**End:**

रामं प्रसन्नवदनं सर्वाभरणभूषितम् ।
एवं श्रीराघवं ध्यात्वा जीवन्मुक्तिर्न संशयः ॥

**Colophon:**

रामयन्त्रं सम्पूर्णम् ॥

---

## No. 8052. रक्तचामुण्डीमन्त्रकल्पः.
## RAKTACĀMUṆḌĪMANTRAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 17*b* of the MS. described under No. 2854 and not on 18*b* as shewn therein.

Complete. 39th Adhyāya of Ākāśabhairavakalpa.

Deals with the Yantra, etc., relating to the Raktacāmuṇḍīmantra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीशिव उवाच—

वक्ष्यामि रक्तचामुण्डि महासिद्धिप्रदायकम् ।
निग्रहानुग्रहाकर्षदक्षमद्भुतमोहिनि ॥
मन्त्रस्य रक्तचामुण्डी(ण्ड्या) ऋषिः शङ्कर उच्यते ।
छन्दोऽनुष्टुप् तथा रक्तचामुण्डी देवताम्बिके ॥

* * * *

श्रीं ह्रीं फट् रक्तचामुण्डीश्वरि शत्रुजीवविनाशिनि एह्येहि शीघ्रमिष्टानाकर्षयाकर्षय स्वाहा ।

* * * *

वृत्तं च सप्तच्छदमष्टपत्रं ततः परं सप्तदशाश्रकं च ।
मध्ये द्विबीजं क्रमशस्तु मन्त्रं दलेषु साध्यं परितो द्विबीजम् ॥
एतत्तु रक्तचामुण्डीयन्त्रमाकर्षमोहयोः ।

**End:**

तथा भवतु चामुण्डी ततस्सा त्वं प्रसीद मे ।
इति दृष्ट्वा ततो देवि दत्ताभयकराम्बुजे ॥
अङ्गुलीयं च गृह्णीयात्तस्य हस्ताब्जसंस्थितम् ।
ततस्त्वेच्छाक्रियां कुर्यान्नित्यालङ्कृतविग्रहः ॥

**Colophon:**

इत्याकाशभैरवकल्पे रक्तचामुण्डीमन्त्रं नाम एकोनचत्वारिंशोऽध्यायः ॥

---

No. **8053.** रसरत्नाकरः (मन्त्रकाण्डः).

RASARATNĀKARAḤ (MANTRAKĀṆḌAḤ).

Pages, 156. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 5629.

By Nityanāthasiddha.

A work on the details of procedure to be adopted with a view to making the repetition of certain Mantras effective.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following Paṭalas:—

१. मन्त्रसाधनम्.
२. सर्वजनवश्यम्
३. राजवश्यम्.
४. स्त्रीवश्यम्.
५. पतिवश्यम्.
३. आकर्षणम्.
७. अग्न्यादिस्तम्भनम्.
८. अशनिस्तम्भनम्.
९. मोहनोच्चाटनकथनम्.
१०. मारणविधिः.
११. विद्वेषादिव्याधिकरणम्.
१२. मन्त्रीकरणम्.
१३. कौतुकयोगः.
१४. यक्षिणीमन्त्रसाधनम्.
१५. सर्वाञ्जनादिसाधनम्.
१६. ज्ञातनिधिग्रहणम्.
१७. अदृश्यकरणम्.
१८. पादुकासाधनम्.
१९. अमृतसञ्जीविनीविद्या.
२०. औषधविन्यासक्रमः.

**Beginning:**

रसरत्नाकरे मन्त्रकाण्डः—

संसारे बहुविस्तीर्णे विद्याशक्तीरनेकधा ।
प्रोक्तवान् शङ्करः पूर्वं पृच्छन्तीं पार्वतीं प्रति ॥

* * * *

शोषितेऽपि न सिद्धिश्चेत् दाहयन् योनिबीजतः ।
आग्ने(ये)नैव बीजेन मन्त्रमालिख्य धारयेत् ॥
कण्ठदेशे तथा मन्त्री सिद्धिस्स्याच्छङ्करोदितम् ।
इत्येवं सर्वमन्त्राणामुपायश्शम्भुनोदितः ॥

**Colophon:**

इति सिद्धनागार्जुनविरचिते कच्छपुटे मन्त्रसाधनं नाम प्रथमः पटलः ॥

**End:**

अदृश्यो जायते सद्यो देवैरपि न दृश्यते ॥
दिग्वेदमुनिकामैश्च ह्यङ्कलीतैलपेषितैः ।
पुष्यभास्करयोगेन त्रिलोहेन तु पेषितैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूर्ध्नि स्वे खेचरत्वं स्याद्योजनानां शतावधि ।
एते सर्वमहायोगाश्चण्डीमन्त्रेण सिद्धिदाः ॥

**Colophon:**

इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे मन्त्रखण्डे साङ्गोपाङ्गकच्छपुटप्रकरणं नाम विंशति(तम): पटलः ॥

---

No. **8054.** रहस्यतन्त्रः.

RAHASYATANTRAḤ.

**Pages,** 106. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 3895.

Incomplete.

The portion of this work as found in this MS. deals with the manner of pronouncing the Cidambaramantra and with the details relating to the repetition thereof.

**Beginning:**

चिदम्बरमनुं वक्ष्ये उपदेशानुसारतः ।
प्रयोगानपि तस्यात्र प्राणशक्तिमनुं पुरा ॥
क्लीं कामबीजमुच्चार्य पूर्वमेहियुगं वदेत् ।

* * * *

चिदम्बरनटेशाख्यमहामन्त्रस्य सर्वदा ।
ऋषिस्सदाशिवश्छन्दो महापूर्वो विराट् भवेत् ॥
पूर्वोक्तो देवता प्रोक्ता हङ्कारं बीजमुच्यते ।
सश्शक्तिः कीलकं मं स्यान्मोक्षार्थे विनियुज्यते ॥

**End:**

ठम् वायानमशि स्तम्भय फट् इदं षष्टिसहस्रेण सेनास्तम्भनं भवति । मृं मृं खे खे यनमशिवा खे खे मारय खे खे षष्टिसहस्रेण जनमारणं भवति ! ओन्नमः क्लीं शिवाय सौः श्रीं सौः ह्रीं इति लक्षजपेन काङ्क्षितं सिध्यति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति वामदेवमुखं समाप्तम् ॥

No. **8055.** रहस्यपटलः.

RAHASYAPAṬALAḤ.

Pages, 15. Lines, 27 on a page.

Begins on fol. 50*b* of the MS. described under No. 2961, and is included in Bhairavayāmala 49*a*, given therein.

Incomplete.

The portion of the work contained in this MS. deals with the manner of conducting the worship in relation to several Mantras, and especially with the manner of lighting the lamp to be used in connection with the repetition of the Durgā-Mantra

**Beginning:**

ऊर्ध्वपुण्ड्रेक्षुकोदण्डपुष्पसायकसंयुताम् ।
ध्यात्वा सम्भोगदुर्गां तां प्रवक्ष्ये मन्त्रपद्धतिम् ॥
पार्वत्युवाच—दीपदुर्गाविधानम् ।
देवदेव जगन्नाथ करुणाकर शङ्कर ।
दीपदुर्गाविधानाख्यमत्याश्चर्यकरं तथा ॥

* * * *

अत्याश्चर्यकरं लोके मन्त्रमेतत्सुपावनम् ।
अतीतानागतं चैव अशरीरेण उ(तू)च्यते ॥
तन्मन्त्रं च विधानं च पूजां चावेशलक्षणम् ।
वक्ष्येऽहं तव हे देवि खलपातकिनां तथा ॥
न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन ।

* * * *

**Colophon:**

इति रहस्यपटले उमामहेश्वरसंवादे दीपदुर्गाविधानं नामाष्टमः पटलः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति सर्वमन्त्राणां दीपविधिः ॥ दुर्गामन्त्राणां पुरश्चर्याविधिः ॥

**End :**

ओं नमो भगवति उच्छिष्टचण्डालि उग्रचण्डालि शक्तिचण्डालि जीवग्राहि मांसग्राहि रक्तपानि वृक्षपोषिणि शत्रुभेदिनि शत्रुभक्षिणि तिमिरि तिमिरि मल्ले मल्ले प्राणघातकि भयङ्करि नानाजन्तुजालवृक्षमारिणि स्वाहा.

---

No. **8056.** रामचक्रन्यासः.

RĀMACAKRANYĀSAḤ.

Substance, paper. Size, 10 × 7 inches. Pages, 16. Lines, 20 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 233*b*. The other works herein are Rāmārcanacandrikā 1*b*, Rāmāvaraṇapūjā 249*b*, Rāmavēdapādastava 262*b*.

Complete.

Deals with the order of arranging the syllables of the Rāma-Mantra in the Cakra called Sītārāma-Cakra, the manner of worshipping it and the details connected with the Nyāsa thereof.

**Beginning :**

अतः परं प्रवक्ष्यामि सर्वलोकोपकारकम् ।
श्रीराममन्त्रन्यासेऽत्र चक्रन्यासमनुत्तमम् ॥

सीतारामात्मकं चक्रं स्वशरीरे विचिन्तयेत् ।
सीताचक्राणि षट् चात्र रामचक्रचतुष्टयम् ॥

पराश्रितं मेलनं च दशावरणसंज्ञिकम् ।

**End :**

अनेन न्यासयोगेन साक्षाद्रामो भविष्यति ।
तस्मात् सर्वप्रयत्नेन न्यासं कुर्याद्यथाविधि ॥

चक्रोद्धारश्च पूजा च चक्रन्यासस्तथैव च ।
एकं च यस्य विद्येत सिद्धो(द्धिं) यात्येव नान्यथा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं सीताराममयं चक्रन्यासमनुत्तमम् ।
गोपनीयं प्रयत्नेन व्याख्यातं ते मया प्रिये ॥

**Colophon :**

इति श्रीरामचक्रन्यासः संपूर्णः ॥

---

No. **8057.** राममन्त्रोद्धारः.
RĀMAMANTRŌDDHĀRAḤ.

**Pages**, 4. Lines, 5 on page.

Begins on fol. 3*a* of the MS. described under No. 5864.

Complete.

On the order of arrangement of the syllables constituting the Rāmamantra and on the details of procedure connected with the repetition thereof.

**Beginning :**

अनन्ताज्ञानवस्वेन्दु (हृद्वह्नि) बीजं रामाय हृन्मनुः ।
षडक्षरोऽयमाश्लिष्टो भजतां कामदो मणिः ॥
ब्रह्मा प्रोक्तो मुनिश्छन्दो गायत्रं देवता मनोः ।
देशिकेन्द्रैस्समाख्यातो रामो रावणमर्दनः ॥
दीर्घभाजा स्वबीजेन कुर्यादङ्गानि षट् क्रमात् ।
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यङ्गेषु पादयोः ॥

**End :**

जपादौ साधितं यन्त्रं स्वर्णकद्र्वादिकल्पितम् ॥
बाहुना विधृतं पश्चाद्विजयश्रीपराक्रमान् ।
गदितं राममन्त्रस्य विधानं मुनिपूजितम् ॥

**Colophon :**

यन्त्रोद्धारस्समाप्तः ॥

राम श्यामाभिरामं रविशशिनयनं कोटिसूर्यप्रकाशं
दिव्यं दिव्यास्त्रपाणिं शरमुखशरधिं चारुकोदण्डहस्तम् ।
कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेददक्षं
भीमं भीमाट्टहासं सकलभयहरं रामचन्द्रं भजेऽहम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8058. रुद्रयामलकल्पकौस्तुभः.

## RUDRAYĀMALAKALPAKAUSTUBHAḤ.

Substance, paper. Size, $10\frac{5}{8} \times 8\frac{1}{4}$ inches. Pages, 156. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Paṭalas 1 to 5 and 84 to 89 in Siddhāgamatantra.

On the Pūjā, the Yantra, the order of arrangement of the syllables and other details connected with the Vanadurgāmantra. Certain Mantras addressed to Viṣṇu, Śiva and Śakti are also incidentally given in one of the Paṭalas.

| | |
|---|---|
| १. वनदुर्गामहाविद्यामन्त्रमाहात्म्यम्. | ८४. महाविद्याक्रमः. |
| २. महाविद्यापुरश्चर्याविधिः | ८५. महाविद्यापारायणक्रमः. |
| ३. महाविद्यामन्त्रोद्धारः. | ८६. महाविद्यादिग्बन्धनम्. |
| ४. महाविद्यायन्त्रोद्धारः. | ८७. वैष्णवशैवशाक्तमन्त्रवर्णनम् |
| ५. मन्त्रजालोद्धारः. | ८८. विद्यापारायणक्रमः. |
| | ८९. महाविद्यानिरूपणम्. |

**Beginning:**

सर्वेश्वरीं जगद्धात्रीं जगदम्बां परापराम् ।
नमाम्यहं महादेवीं महात्रिपुरसुन्दरीम् ॥

* * * *

वनदुर्गामहाविद्यामन्त्रमाहात्म्यमुत्तमम् ।
कथितन्ते महेशानि किं पुनः श्रोतुमिच्छसि ॥

**Colophon:**

इति श्रीकल्पकौस्तुभे प्रथमः पटलः ॥

* * * *

महालक्ष्मीमन्त्रमादौ वश्याचामुण्डिकामनुम् ।
एवं बन्धसमायुक्तो महाविद्यां जपेत्प्रिये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीरुद्रयामले सिद्धागमतन्त्रे पञ्चमः पटलः ॥

* * * *

एवं कृत्वा च दिग्बन्धमैन्द्रादीर्बन्धयेद्दिशः ।
निगमैरागमैर्मन्त्रै रुद्रबन्धनपूर्वकम् ॥

**Colophon :**

इति श्रीरुद्रयामले सिद्धागमे तन्त्रे महाविद्योद्धारे चतुरशीतितमः पटलः ॥

**End :**

सम्यक् संसिद्धमन्त्रस्तु नित्यमेवं समाचरेत् ।
पारायणं नित्यमेकं कुर्वन्मन्त्री विचक्षणः ॥
सुवासिनीं ब्राह्मणं च तर्पयेत्तत्र तत्र तु ।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

**Colophon :**

इति श्रीरुद्रयामले पार्वतीपरमेश्वरसंवादे सिद्धागमतन्त्रे महाविद्यानिरूपणं नाम एकोननवतितमः पटलः ॥

---

## No. **8059.** रुद्रयामलकल्पकौस्तुभः.

## RUDRAYĀMALAKALPAKAUSTUBHAḤ.

Substance, paper. Size, $9\frac{3}{8} \times 7\frac{3}{8}$ inches. Pages, 186. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Paṭalas 1 to 8 and 87 to 89 in Siddhāgamatantra.

Same as the above.

---

## No. **8060.** रुद्रयामलम्.

## RUDRAYĀMALAM.

Pages, 23. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8031.

A portion of Rudrayāmala from Dānakalpa to the end of Āliṅganadāna.

462-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Deals with the manner of offering gifts with a view to get rid of fear, sickness, poverty and various other kinds of evil.

**Beginning:**

शौनको(क्तरुद्रयाम)ले—

नृपाणां पट्टबन्धानाममात्यानां विशेषतः ।
गृहदोषे समुत्पन्ने मालायोगाद्युपप्लवे ॥
दुस्स्वप्नाद्भुतसत् . . . . . भाद्युपप्लवे ।
बलादिरोधसमये धनमानक्षयादिषु ॥
स्थिते संशयकाले च भयेष्वन्येषु वा यदि ।
छागदानं प्रकुर्वीत तत्तद्भयहरा . . ॥
(अभीष्ट)फलसिध्यर्थं छागदानं समाचरेत् ।
अमारिक्तादितिथिषु व्यतीपाते च वैधृतौ ॥
विष्ट्यां कष्टदिने वापि जन्मर्क्षे वा त्रिजन्मसु ।

**End:**

ये तु रोगाः प्रबाधन्ते दातुस्ते पापकर्मजाः ॥
तान् रोगान् प्रतिगृह्णामि त्वं जीव शरदः शतम् ।
एवं दानं प्रकुर्वीत व्याधिपीडापनुत्तये ॥
एकवारं द्विवारं वा त्रिवारं वाथ शक्तितः ।
सर्वरोगोपशान्त्यर्थं सत्यं सत्यं शिवोदितम् ॥

**Colophon:**

इति रुद्रयामळे आलिङ्गनदानविधिः ॥

---

No. 8061. रुद्रयामलम्.

RUDRAYĀMALAM.

Substance, palm-leaf. Size, 13 × 1⅝ inches. Pages, 15. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete Forms the 33rd Paṭala of Rudrayāmala and deals with the manner of conceiving in the mind the deities to

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



whom particular Mantras are addressed. Wants two pages at the beginning.

**Beginning:**

कम्बुकण्ठीं सुताम्रोष्ठीं मदविह्वललोचनाम् ।
भजेऽहं बगलान्देवीं पीताम्बरवराशि(सि)ना(का)म् ॥
ओन्नमो बगलान्देवीमासवप्रियभामिनीम् ।
भजेऽहं स्तम्भनार्थश्च गदां जिह्वाञ्च बिभ्रतीम् ॥

**End:**

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु दुर्लभम् ।
गुरुभक्ताय साधूनां न देयं यस्य कस्य वै ॥

**Colophon:**

इति श्रीरुद्रयामले सांख्यायनतन्त्रे मूर्तिन्यासध्याने त्रयस्त्रिंशः पटलः ॥

---

## No. 8062. रुद्रविधानम्.

## RUDRAVIDHĀNAM.

**Pages**, 30. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 129.

Incomplete.

On the details connected with the repetition of certain Sūktas addressed to Rudra.

**Beginning:**

अथातो रुद्रविधानं व्याख्यास्यामः । स्नात्वा सर्वोपद्रवनाशनमिति इषे त्वेति मन्त्रेण दशप्रणवसहितेन खं ब्रह्मान्तेषु याः क्रियाः प्रणवः ब्रह्मा भूर्भुवस्सुवरोम् । भूरसि इति भूमिप्रार्थनं, ये भूतानामधिपतिरिति क्षेत्राधिपतिप्रार्थनम्, चत्वारि शृङ्गेत्यासनं, शिरसा जातवेदस इति कश्यप ऋषिः, जातवेदसाग्निर्दुर्गा देवता, त्रिष्टुप् छन्दः, दुर्गाप्रार्थने विनियोगः । ओं जातवेदसे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

द्यौश्शान्तिरन्तरिक्षंश्शान्तिः पृथिवी शान्तिरापश्शान्तिरोषधयश्शान्तिर्वनस्पतयश्शान्ति(श्शान्ति)रेव शान्तिः । कालाय नमः गन्धं समर्पयामि । कलविकरणाय नमः तिलाक्षतान् . . . . . . . . . . . . . . . . . . . अमुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य अन्यमस्मदिच्छ सा त इत्या नमो निरृते तुभ्यमस्तु क्षां निरृतये रक्षोऽधिपतये खड्गहस्ताय साङ्गहस्तायुधसवाहनसशक्तिपत्नीपुत्रपरिवारसहिताय नमः निरृतिमावाहयामि.

---

No. **8063**. रेणुकातन्त्रम्.

RĒNUKĀTANTRAM.

Pages, 8. Lines, 25 on a page.

Begins on fol. 85*a* of the MS. described under No. 5629.

On the details of procedure connected with the repetition of the Mantra addressed to Rēṇuka, the mother of Paraśurāma.

**Beginning:**

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि रेणुकामन्त्रमुत्तमम् ।
यस्य विज्ञानमात्रेण सर्वकार्याणि साधयेत् ॥
अस्य रेणुकामन्त्रस्य भार्गवोरुचि (व ऋषि)रुच्यते ।
छन्दोऽनुष्टुप् तथात्युक्ता रेणुका देवताह्वया ॥
क्रां बीजं क्रीं शक्तिः क्रुं कीलकमुदीरितम् ।
सर्वकार्यार्थसिद्ध्यर्थे विनियोगो वरानने ॥

* * * *

**Colophon:**

इत्येतदमरेश्वरतन्त्रे रेणुकाकल्पे चतुष्षष्टितमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ओं श्रीं ह्रीं क्लीं ह्सखफ्रें ऐं महाप्रकटयोगिनि एकवीरके ह्रीं जगन्मोहिनि ह्रीं नागलोकभूलोकादिसत्यलोकानां श्रीं श्रीं शीघ्रमाकर्षिणीं (णि) क्लीं सकलमनोरथाकर्षिणीं(णि) सर्वसिद्धिं कुरु कुरु सौः क्लां आ आ (रेणु)के स्वाहा ॥

**Colophon:**

इति डामरेश्वरतन्त्रे रेणुकामालामन्त्रस्वरूपं नाम चतुष्षष्टितमोऽध्यायः ॥

---

No. **8064.** रेणुकातन्त्रम्.

RĒṆUKĀTANTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 5417.

Complete.

Similar to the above.

**Beginning:**

अथ यन्त्रम्—

षट्त्रिंशत्कोष्ठसंयुक्तं रेणुकायन्त्रमुत्तमम् ।
लिखित्वा क्लीं च शूलाग्रे साध्यनामाभिसंयुतम् ॥
यन्त्रमध्ये साध्यनाम लिखेत्सर्ववशीकरम् ।

**End:**

शं स्तम्भे वौषडाकर्षे नमस्सम्पत्तिरेव च ।
स्वाहा शान्तिस्स्वधा पुष्टिः इत्येते मन्त्रपल्लवाः ॥

---

No. **8065.** लक्ष्मीमन्त्रकल्पः.

LAKṢMĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 2854.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Forms the 44th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the Mantra addressed to Lakṣmī.

**Beginning :**

श्रीशिव उवाच—

लक्ष्मीमन्त्रं प्रवक्ष्यामि सर्वसौभाग्यवर्धनम् ।
आयुष्करं महावश्यममोघं जयवर्धनम् ॥
लक्ष्मीमन्त्रस्य वामेश ऋषिश्छन्दस्तु बृहती ।
महालक्ष्म्याः प्रसादस्य सिद्ध्यै सर्वसमृद्धये ॥
सर्वलोकवशीकारे विनियोगस्तथाम्बिके ।

**End :**

यो जपेदन्वहं प्रातरष्टोत्तरशतं सुधीः ।
तस्य सर्वसमृद्धिस्स्यात्संशयो नास्ति सुन्दरि ॥

**Colophon :**

इत्याकाशभैरवकल्पे लक्ष्मीमन्त्रं नाम चतुश्चत्वारिंशोऽध्यायः ॥

---

## No. 8066. लघुचक्रपद्धतिः.
## LAGHUCAKRAPADDHATIḤ.

**Pages**, 6. Lines, 16 on a page.

Begins on fol. 206*b* of the MS. described under No. 424

Complete.

On the measurement to be adopted in regard to Mantracakras, and the manner of drawing them in a compact form.

**Beginning :**

ह्रासे देवीकृते तत्तमगलविगते तोषभागे झसूत्रान्
कृत्वा पूरीदलान्ते गवलवमुभयोर्वा तयोस्तोयभागान् ।
धान्यांशान्मे विमार्जे प्लधितुवरणाग्राणि सूत्रद्वयानि
प्राक् प्राधंरोधिगानं विधिमदवगं दिव्यसूनुश्चिरं स्यात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्यार्थस्तु द्वा इति द्वयं कथयति । से इति सप्त । एवं कटपयादिक्रमेण द्विसप्तत्यङ्गुलानि भवन्ति । चक्रोल्लेखनप्रकारस्तु, षट्त्रिंशदङ्गुलायामं सूक्ष्मसूत्रं संपाद्य वृत्तक्रमेण वलयं कृतं चेत् पूर्वोत्तरभागाभ्यां द्विसप्तत्यङ्गुलायामं भवति । तन्मध्ये पूर्व(पौरस्-)त्यार्धद्वाविंशत्यङ्गुलसूत्रेण वृत्तं कृतं चेत् पूर्वोत्तराभ्यां पञ्चचत्वारिंशदङ्गुलायामं भवति ।

**End:**

शेषाङ्गुलीभिः क्रमतस्सुलेख्यं पुरत्रयं हे त्रिपुरे महेशि ॥
सूर्यं सूर्यसुतं च केतुमुडुराड् भूमीसुतो वृत्तकं
राहुं सौम्यबुधं च केतुरगमच्छुक्रस्तथा चेन्दुगः ।
सूर्यो राहुरथाङ्गिरस्सुत(गत)श्चाङ्गारकं . . तां
मन्दं प्राग्दिशि वृत्तकं च विहरेश्चक्रं शिवायाः परम ॥

---

No. **3067.** वनदुर्गाकल्पः.

VANADURGĀKALPAḤ.

**Pages,** 51. Lines, 20 on a page.

Begins on fol. 32*a* of the MS. described under No. 5643. Complete.

On the details connected with the repetition of the **Vanadurgā-mantra.**

Contains the following Paṭalas :—

१. वनदुर्गामन्त्रोद्धारादिः.
२. वनदुर्गापुरश्चर्याविधिः.
३. होमबलिदानाविधिः.
४. वनदुर्गाध्यानविभवः.
५. जपकर्मविधिः.
६. होमकर्मविधिः.

**Beginning:**

नानाद्रुमसमाकीर्णे नानापुष्पोपशोभिते ।
नानापक्षिसमाकीर्णे नानामृगसमन्विते ॥
* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृपया परयाभीक्ष्णं षण्मुखं द्वादशेक्षणम् ।
प्रणम्य दण्डवद्भूमौ पप्रच्छ मुनिसत्तमः ॥

अगस्त्य उवाच—

किं रूपं वनदुर्गायाः कान्यङ्गानि विशेषतः ।
उद्धारः कीदृशः प्रोक्तो विनियोगश्च कीदृशः ॥
किं बीजं का पुनश्शक्तिर्वर्णानां च तथैव च ।
एतत्सर्वं च विस्तीर्य ब्रूहि मे दैत्यनाशन ॥

* * * *

**Colophon:**

इति वनदुर्गाकल्पे गुहप्रोक्ते प्रथमः पटलः ॥

**End:**

काकोलूकवसाभ्यक्तैस्तद्वर्णैर्म्रियते रिपुः ।
अर्धरात्रे महारण्ये कुर्यात्सर्वत्र मारणम् ॥
अमोघोऽयं प्रयोगः स्यात् शत्रुर्मासं भविष्यति ।
अथैवं विषमूलेन समं कुर्याद्विधानतः ॥

---

No. **8068.** वनदुर्गाकल्पः.

VANADURGĀKALPAḤ.

Pages, 40. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 7799.
Complete.
Same as the above.

---

No. **8069.** वनदुर्गाकल्पः.

VANADURGĀKALPAḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 122*a* of the MS. described under No. 124.
Complete.
Same as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8070. वनदुर्गामन्त्रविषयः.

## VANADURGĀMANTRAVIṢAYAḤ.

Pages, 28. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No. 7799.

Complete.

This is the 2nd Paṭala of Śāradātilaka.

Similar to the above. Deals chiefly with the Yantra relating to the Vanadurgāmantra.

**Beginning:**

बिन्दुत्रिकोणषट्कोणचतुर्दलाष्टदलषोडशदलद्वात्रिंशद्दलभूपुरद्वितयं चेति भद्रयन्त्रलक्षणम् । तत्र बिन्दौ मायागर्भितदुर्गाबीजं, कोणत्रये वाग्भवकामराजशक्तिबीजान्यग्रादि प्रादक्षिण्येन लिखेत् । ततः षट्कोणे उत्तिष्ठ पुरुषि ज्वल किं स्वपिषि प्रज्वल भयं मे समुपस्थितं ज्वालामालिनि यदि शक्यमशक्यं वा शूलिनि तन्मे भगवति त्रिशूलवरधारिणि शमय स्वाहा कपर्दिनि इति षडङ्गमन्त्रान् स्वान्तादि प्रादक्षिण्येन लिखेत् ।

**End:**

यन्त्रं विन्ध्यनिवासिन्यै प्रोक्तं सर्वसमृद्धिदम् ॥
रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम् ।
राज्यदं राष्ट्रदं राजवश्यदं वश्यमिच्छताम् ॥
सुतार्थिनां च सुतदं रोगिणां रोगनाशनम् ।
बहुना किं मयोक्तेन यन्त्रं तत्कामदं नृणाम् ॥

**Colophon:**

इति शारदातिलके द्वितीयः पटलः समाप्तः ॥

---

## No. 8071. वनदुर्गामन्त्रविषयः.

## VANADURGĀMANTRAVIṢAYAḤ.

Pages, 28. Lines, 20 on a page.

Begins on fol. 57*a* of the MS. described under No. 5643, and is included in Vanadurgākalpa 32*a* shewn among the other works therein.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This is the 2nd Paṭala of Śāradātilaka

Same as the above.

---

No. 8072. वनदुर्गामन्त्रविषयः.

VANADURGĀMANTRAVIṢAYAḤ.

Pages, 16. Lines, 8 on a page.

Begins on fol. 132*b* of the MS. described under No. 124, and is included in Vanadurgākalpa 122*a* shown among the other works therein.

Complete.

Same as the above.

---

No. 8073. वनदुर्गायन्त्रोद्धारः.

VANADURGĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 5639, wherein it is shown as Mahāvidyāyantrarāja.

Complete.

On the manner of drawing the Yantra relating to the Vanadurgāmantra and the method of filling it up with the syllables of the Mantra.

**Beginning**:

महाविद्यायन्त्रराजं प्रवक्ष्यामि समीहितः ।
बिन्दुत्रिकोणमालिख्य षट्कोणं वृत्तसंयुतम् ॥
अष्टारं तु सवृत्तं च ततः षोडशपत्रकम् ।

* * * *

चतुष्षष्टिदलं पश्चाद्वृत्तं भूपुरसंयुतम् ।
एतद्यन्त्रं महादेवि यन्त्रराजं सुरेश्वरि ॥
अत्र बीजं कर्णयुक्तं बिन्धुमध्ये सबिन्दुकम् ।

**End**:

बहुनोक्तेन किं देवि सर्वकार्यार्थसाधनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतद्यन्त्रस्य माहात्म्यं मम वक्तुं न शक्यते।
त्र्यीशानि महादेवि सत्यं सत्यं न संशयः ॥

**Colophon:**

इति शम्बरतन्त्रे उमामहेश्वरसंवादे वनदुर्गायन्त्रोद्धारस्समाप्तः ॥

---

## No. 8074. वर्णनिघण्टुः.
## VARṆANIGHAṆṬUḤ.

**Pages, 9.** Lines, 16 on a page.

Begins on fol. 102*b* of the MS. described under No. 424.

Complete.

A lexicon giving the various meanings of the letters of the alphabet or Matṛkākṣaras as used in relation to Mantras.

**Beginning:**

प्रणम्य परमानन्दं श्रीगुरुं पुरुषोत्तमम्।
मातृकार्णनिघण्टुं यं (प्रवक्ष्ये)बालबुद्धये ॥
प्रणवस्तारकोऽव्यक्तोऽवेदादिश्च शिवोऽव्ययः।
आदिमश्च ध्रुवोङ्कारो मूलज्योतिश्शिवादिकः ॥
त्रिवृद्ब्रह्मा त्रिमात्रश्च शब्दाः प्रणववाचकाः।

**End:**

हंसप्राकारवर्णानां संज्ञामायाविसर्गिणः।
एषा स्वतन्त्रतन्त्रोक्ता वर्णसंज्ञा समीरिता ॥

**Colophon:**

समाप्तिः ॥

---

## No. 8075. वशीकरणविद्यामन्त्रकल्पः.
## VAŚĪKARAṆAVIDYAMANTRAKALPAḤ.

**Pages, 4.** Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 6045, and is included in Yantracintāmaṇi shown among the other works therein.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the Yantra related to a Mantra considered to have the power to enable one to exercise influence over all people.

**Beginning:**

अस्य श्रीवशीकरणविद्यामहामन्त्रस्य वामदेव ऋषिः; देवी गायत्री छन्दः वशीकरणविद्या देवता ।

* * * *

सर्वलोकवश्यं कुरु कुरु स्वाहा । द्वात्रिंशद्वर्णसहस्रं जप्त्वा । लमिति पञ्चपूजां कुर्यात् ।

अथ यन्त्रक्रममाह—

तिर्यक् तथोर्ध्वं शररत्नरेखाः क्रमणे मन्त्रोपरि तत्रिशूलम् ।

कामाख्यदं यन्त्र . . . . . . . . . . . ॥

धना(क्षणा)त्तत्साके(ध)केन्द्रस्य वश्यमायान्ति जन्तवः ।

एवं तु कामिनी कुर्यात् कामनं कामनाधिया ॥ इति ।

**End:**

दिक्पालबीजानि मध्ये विलिख्य रं लं हं षं नं यं सं शं इं ईं टं टां आं ह्रीं आं ह्रीं क्रं सर्ववश्याधिकं भवेत् ॥

---

## No. 8076. वश्यमन्त्रकल्पः.

## VAŚYAMANTRAKALPAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 198*b* of the MS. described under No. 119, wherein this has been omitted to be shown among the other works.

Contains two Ślōkas on the method of drawing the Yantra relating to the Vaśyāmantra.

**Beginning and End:**

मुस्वरञ्जनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वशङ्कुवशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन्त्रोद्धारणम्--

त्रिकोणकर्णिकं पञ्चपद्मपत्रे मनुः प्रिये।
अष्टपत्रबहिर्देवीं पुनष्षोडशपत्रकम् ॥
तद्वाह्येऽष्टदलं प्रोक्तं चतुष्पत्रे मनुः प्रिये।
चतुरश्रं तु तद्बाह्ये देवि देव्यासनं भवेत ॥

---

No. **8077.** वश्याञ्जनादिप्रयोगः.

VAŚYĀÑJANĀDIPRAYŌGAḤ.

**Pages,** 8. Lines, 16 on a page.

Begins on fol. 18*a* of the MS. described under No. 7739.

Complete.

On the method of preparing an unguent for the eyes, considered to be efficacious in driving away one's enemies, in creating enmity between two persons or in bringing others under one's control.

**Beginning :**

उलूकनेत्रं सङ्गृह्य तत्पित्तेनैव मर्दयेत् ।
पातालमधुना सार्धमञ्जयेद्धरणीं ततः ॥
एतत्सर्वाञ्जनं ज्ञेयं सुलभं द्रव्यशोधनम् ।
तदस्थिकीलकं कुर्यात् विक्षिपेद्वैरिमन्दिरे ॥
पक्षादुच्चाटनं चैव विद्वेषो जायते ध्रुवम् ॥

**End :**

चन्द्राट्टहासदव्याय विकृतरूपिणे कट कट भञ्जय भञ्जय प्रसर प्रसरावेशयावेशाय गुरुस्तु गुरुस्तु कम्पय कम्पय अमुकं ज्वरेण गृह्ण गृह्ण हुं फट् स्वाहा ॥

---

No. **8078.** वश्याद्यष्टकर्मलेखः.

VAŚYĀDYAṢṬAKARMALĒKHAḤ.

**Pages,** 5. Lines, 18 on a page.

Begins on fol. 3*a* of the MS. described under No. 6045, wherein this has been included in Yantracintāmaṇi.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Deals with the nature of the syllables to be introduced into the Yantra relating to the Pañcākṣara mantra, so as to indicate the objects to be attained by using the Mantra.

**Beginning:**

स्तम्भनं मोहनं चैव नकारेण तु मन्त्रकम् ।
वश्यमाकर्षणं प्रोक्तं वाकारेण तु मन्त्रकम् ॥
मकारान्तं तु विद्वेषं यकारं मोक्षशान्तिकम् ।
शिकारोच्चाटनं कृत्वा संहारक्रम उच्यते ॥
वश्ये तु बिल्वफलकैः पञ्चविंशतिकोष्ठकैः ।
चतुर्थं च तृतीयं च द्वितीयं पञ्चमाद्यकम् ॥
पञ्चाक्षरक्रमेणैव विलिखेत्तदनन्तरम् ।

**End:**

तालपत्रे श्यामलिप्ते विलिख्यैवं सुसाध्यकम् ।
पुरस्तात्तद्विलिप्तं तत् पत्रं दीपेषु दापयेत् ॥

इति भेदनम् ॥

* * * *

उकारं लोकदैवत्यं वास्तुदैवत्यमेव च ।
बलवर्धनबीजं च कालदैवतमेव च ॥
उकार पृथ्विबीज(न्तू)च्चाटनं शत्रुमारणम् ।

---

No. 8079. वागीश्वरीध्यानम्.
VĀGĪŚVARĪDHYĀNAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 121*a* of the MS. described under No. 5688.

Complete.

On the manner of meditating upon and worshipping Sarasvatī, and on the method of repeating the Mantra addressed to her.

**Beginning:**

मम ज्ञानशक्त्यात्मकवागीश्वर्यादिसारस्वतशक्तिमन्त्राराधनाविधानम-भिधीयते । तत्र वागीश्वरीमन्त्रः स च वदेति पदद्वयादिकः वाग्वा-दिनीति पदोपेतस्वाहान्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणवभुवनेश्वरीसंपुटितमन्त्रोऽयं महासारस्वतप्रदः । वागीश्वरीमन्त्रस्य कण्व ऋषिः, विराट् छन्दः वागीश्वरी देवता ।

**End:**

एवं ध्यात्वा मानसार्चनपूर्वकमावरणयुक्तं बाह्यार्चनं कुर्यात् तत्र देव्याः पार्श्वयोः संस्कृतप्राकृतवाग्देव्यौ संपूज्य आवरणपूजां कुर्यात् .

* * * *

देवीध्यानपुरस्सरं प्रतिदिनं सहस्रत्रयजपो वक्षस्स्थलप्रमाणजलस्थस्य महासारस्वतकरः ॥

---

## No. 8080. वाराहीमन्त्रकल्पः.

## VĀRĀHĪMANTRAKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 30*b* of the MS. described under No. 2854.

Complete.

70th Adhyāya of Ākāśabhairavakalpa.

Gives details regarding the Yantra and Pūjā relating to the Vārāhīmantra, and also the manner of repeating it.

**Beginning:**

अथ मन्त्रस्य वाराह्या ऋषिरत्रिर्जितेन्द्रियः ।
छन्दोऽनुष्टुप् ततो देवी वाराही देवताम्बिके ॥
वं बीजमथ हुं शक्तिः अभीष्टे विनियोगकम् ।
वामित्यादिकराङ्गस्य न्यासं मूलेन वाम्बिके ॥
वज्रोपलसमां नीलां प्रसन्नमहिषासनाम् ।
सर्वदुःखहरां घोरां स्तब्धलोमाननां नुमः ॥

**End:**

साध्यमायावृतं यन्त्रं सर्वदुष्टनिवारणम् ॥
संपूज्य विधिवद्देवीं जपेदष्टसहस्रकम् ।
दक्षिणाभिमुखं देवि जपेतद्रिपुनाशनम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इत्याकाशभैरवकल्पे वाराहीमन्त्रं नाम सप्ततितमोऽध्यायस्समाप्तः ॥

---

## No. 8081. विद्याप्रदमन्त्रकल्पः.

## VIDYĀPRADAMANTRAKALPAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 138*a* of the MS. described under No. 2848, wherein this was omitted to be shown among the other works.

Complete.

Gives details regarding the Yantra and Pūjā relating to a Mantra considered to have the power of bestowing wisdom and learning; and also deals with the manner of repeating that Mantra.

**Beginning :**

. . . . . . साधु यन्त्रं नवनीते प्रतिजप्य मन्त्रमेनम् ।
परिभक्षयतामनङ्गबाधा प्रशमं गच्छति शुद्धिमेति चेतः ॥
प्रयोगान्तरम्—
आदाय कोष्णं सलिलं प्रसन्नं प्रजप्य मन्त्रं प्रपिबद्विवारम् ।
रागादिदोषप्रशमाय बुद्धेर्ज्ञानोदयाय प्रशमाय वृत्तेः ॥

**End :**

पुनस्तद्बहिर्वृत्तं विलिख्य तस्मिन् कादिवर्णैर्वेष्टयेत् । पुनस्तद्ब हिश्चतुरश्रं विलिखेत् । एवं नवपत्रे वा स्वर्णपट्टे वा विलिख्य नारीमुपयुज्यात् । तस्मात्पुत्रं प्रसूयते ॥

---

## No. 8082. विनायककल्पः.

## VINĀYAKAKALPAḤ.

Pages, 39. Lines, 6 on a page.

Begins on fol. 140*a* of the MS. described under No. 2848.

Complete.

On the details connected with the Yantra, Pūjā and Japa of the Mantra addressed to Vināyaka.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

गुरुं सदाशिवं शम्भुं रुद्रं विश्वम्भरं विधिम् ।
परां पराशिवां मायां वन्दे रौद्रीं श्रियं गिरम् ॥

श्रीशिव उवाच—

देवेश जगतां नाथ चित्सदानन्द शाश्वत ।
चिदाख्यानमिह श्रोतुं चिरादिच्छाम्यहं प्रभो ॥

* * * *

सर्वदेवमयश्शम्भुश्शिववन्द्यो विनायकः ।
तस्माद्वैनायकं कल्पमृजु सर्वार्थसिद्धिदम् ॥

**End:**

मध्ये बीजं ग्लौं शिखां त्रिकोणे त्रिवर्णं वसुदलकमले शिष्टमन्त्रवर्णं त्रिवर्णं भूकोणे बीजयुक्तं सकलरिपुकलासाहितरिपु एहि ह्रीङ्कारावृतम् । अरिपक्षशत्रुजन्मर्क्षे पवनशतजपं प्राणप्रातिष्ठामन्त्रशतवारं क्रूरसिक्तं स्नुहिक्षारादिक्रूरद्रव्यसिक्तं साम्यद्रव्यसिक्तं सिरात्रितयम् ॥

---

## No. 8083. विश्वामित्रकल्पः.
## VIŚVĀMITRAKALPAḤ.

Pages, 25. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 5362, and is included in Viśvāmitrasaṁhitā shown among the other works therein.

On the details connected with the rites preliminary to the repetition of the Gāyatrīmantra.

Contains the following Paṭalas:—

१. आह्निकयोगः.
२. आचमनविभागयोगः.
३. प्राणायामविधिः.
४. मार्जनविधिः.
५. अर्घ्यप्रदानयोगः.
६. आवाहनादिन्याससंयोगः.
७. कालजपयोगः.
८. उपस्थानयोगः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

विश्वामित्रकल्पे आह्निकविधिं व्याख्यास्यामः ।
स गुरुं पूजयेद्देवीमुपचारैस्तु पञ्चकैः ॥
भक्तिश्रद्धानुसारेण विश्वामित्रं प्रकल्पयेत् ।
अस्य मन्त्रस्य प्रश्नस्य प्राणापानं निरुन्धयेत् ॥

* * * *

**Colophon:**

इति विश्वामित्रकल्पे आह्निकयोगो नाम प्रथमपटलः ॥

**End:**

त्रिपादजपसाद्गुण्यं तुर्यपादं दशांशकम् ।
तुर्यजाप्यं विना येन कुरुते निष्फलं भवेत् ॥

**Colophon:**

इति विश्वामित्रकल्पे उपस्थानयोगो नाम अष्टमोऽध्यायः ॥

---

No. **8084.** विषतन्त्रम्.

VIṢATANTRAM.

**Pages,** 13. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under No. 7991.

Incomplete.

Gives how poison came into the world and states what things are poisonous. Also gives a Mantra which is considered to be efficacious in removing snake poison.

**Beginning:**

विषतन्त्रं प्रवक्ष्यामि सङ्क्षेपेण निबोध मे ।
मथ्यमाने जलनिधौ अमृतार्थे सुरासुरैः ॥
जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शन ।
दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशोऽनलेक्षणः ॥
जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञिकः ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चाक्षरेण मन्त्रेण चाहरेत् सर्पजं विषम् । क्षिप ओं स्वाहा—एतद्गरुडपञ्चाक्षरी जरत्कारो जरत्कावी(रो)त्राहि मां विषसर्पतः ।

**End:**

अविं कुसुम्भशाकेन बिसैस्सह वरूडकम् ।
शष्कुलीमारनालेन नाद्यान्मधु गुडेन तु ॥
न जातु कटुतैलेन भ्रष्टान्नाद्यात् कपोतकान् ।

---

## No. 8085. वीरभद्रमन्त्रकल्पः.

## VĪRABHADRAMANTRAKALPAH.

Pages, 2. Lines, 8 on a page.

Begins on fol. 28*b* of the MS. described under No. 2854.

Complete.

63rd Adhyāya of Ākāśabhairavakalpa.

On the Yantra and Pūjā relating to the Vīrabhadramantra, and also on the manner of repeating that Mantra.

**Beginning:**

श्रीशिवः—

वक्ष्यामि वीरभद्रस्य मन्त्रं सर्वार्थसाधकम् ।
निग्रहानुग्रहकरं [दिव्यं] साधकानां जयावहम् ॥
अस्य श्रीवीरभद्रस्य कालाग्निरुद्र ऋषिस्स्मृतः ।
जगती छन्द इत्युक्तो वीरभद्रस्तु देवता ॥
वीं बीजं हुं ततश्शक्तिः विनियोगस्तु निग्रहे ।
व्यामित्यादिकराङ्गस्य न्यासं कृत्वाथ भावयेत् ॥

**End:**

ठङ्कारमध्ये परिलिख्य मन्त्रं बाह्येऽष्टपत्रेषु च हुंफडर्णम् ।
संवेष्ट्य पाशाङ्कुशमातृकान्यान् आराधयेच्छ्यामलवीरभद्रम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आराधनावसानेषु मातृकावर्णपूर्वकम् ।
सर्वकार्यार्थसिद्ध्यर्थं जपेत् सिध्यति शोभने ॥

**Colophon:**

इत्याकाशभैरवकल्पे श्यामलावीरभद्रं नाम त्रिषष्टितमोऽध्यायः समाप्तः ॥

---

No. **8086.** वैष्णवीमन्त्रकल्पः.

VAIṢṆAVĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 2854 and not on 30*b* as shown therein.

Complete.

69th Adhyāya of Ākāśabhairavakalpa.

On the manner of drawing the Yantra and performing the worship relating to the Mantra addressed to Vaiṣṇavī, one of the manifestations of Śakti.

**Beginning:**

अथ मन्त्रस्य वैष्णव्या ऋषिर्विष्णुरनन्तरम् ।
गायत्री छन्द इत्युक्तो वैष्णवी देवता ततः ॥
वं बीजं चाथ सं शक्तिः विनियोगस्त्वभीष्टके ।
वां सामित्यादिहृस्तस्य न्यासमङ्गस्य तत्परम् ॥

**End:**

आराध्य देवीमनुवासरं यो जपेत् सहस्रं प्रयतः प्रदोषम् ।
तस्याशु सिद्धिं धनधान्यवृद्धिं सौभाग्यजात्यां तनुते तु लक्ष्मीम् ॥

**Colophon:**

इत्याकाशभैरवकल्पे वैष्णवीमन्त्रं नाम एकोनसप्ततितमोऽध्यायस्स-
माप्तः ॥

---

No. **8087.** शतधारयन्त्रधारणविधिः.

ŚATADHĀRAYANTRADHĀRAṆAVIDHIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 18*b* of the MS. described under No. 5832.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the method of drawing, worshipping and wearing on the body, the Śatadhārayantra, i.e , the Yantra relating to the Cakra of Viṣṇu, which is considered to have the power of warding off untimely death in children.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य गोत्रोद्भवस्य धर्मपत्न्या गर्भस्थशिशोरपमृत्युपरिहारार्थं . . . . . . . . शतधारयन्त्रधारणकाले मण्टपप्रतिष्ठापनं करिष्ये । नूतनवस्त्रं प्रागग्रे निधाय तन्मध्ये यथाशक्ति तण्डुलं निधाय भूरेरवा अष्टाक्षरीदलसंवृतं लिखित्वा तन्मध्ये नृसिंहबीजं लिखित्वा ।

**End :**





शङ्खं चक्रं च पाशं परशुमसिमिषुं . . . सकलरिपुजनप्राणसंहारचक्रम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पर्वत . . आयच्छ ब्रह्मणस्पते । सर्वेषां वृद्धसुवासिनीनां करस्पर्शनं कृत्वा पुरुषहस्तेन धारणं कृत्वा तत आशीर्वचनं कृत्वा ॥

---

No. **8088.** शब्दाकर्षिणीभाषामन्त्रकल्पः.

ŚABDĀKARṢIṆĪBHĀṢĀMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 2854, wherein this has been omitted to be shown among the other works.

Complete.

43rd Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of a certain Mantra addressed to Sarasvatī, which is considered to have the power of enabling a person to understand the meaning of every word he hears.

**Beginning:**

श्रीशिव उवाच—

वदामि शृणु ते गुह्यं भाषामन्त्रमनुत्तमम् ।
यस्य स्मरणमात्रेण सुप्रसन्ना सरस्वती ॥
ऋषिर्मन्त्रस्य भारत्या ब्रह्मा गायत्रिरुच्यते ।
छन्दो देवी महावाणी देवता सान्तमद्भुतम् ॥
बीजशक्तिस्ततः स्वाहा विनियोगो विशेषतः ।
सर्वशब्दार्थविज्ञानासिद्ध्यै सारस्वताप्तये ॥

**End:**

सभासंवेशने काले प्रतिवादिसमाकुले ।
मनसा सञ्ज(ज्ज)विजयो(भवेन्निज)गुरुं स्मरन् ॥

**Colophon:**

इत्याकाशभैरवकल्पे शब्दाकर्षणीभाषामन्त्रो नाम त्रिचत्वारिंशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8089. शब्दाकर्षिणीमन्त्रकल्पः.

## ŚABDĀKARṢIṆĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 18*b* of the MS. described under No. 2854.

Complete.

42nd Adhyāya of Ākāśabhairavakalpa.

Similar to the above.

**Beginning :**

शब्दाकर्षणिकायास्तु बलप्रमथनऋ(स्त्वृ)षिः ।
जगती छन्द इत्युक्तो (देवता)सैव सुन्दरी ॥
पकारं बीजमित्युक्तं स्वाहा शक्तिस्ततः परम् ।
शब्दाकर्षणसिद्ध्यर्थे विनियोगस्तथाम्बिके ॥

**End :**

इति गुह्यं महामन्त्रं सर्वज्ञानप्रदं परम् ।
सर्वदा सर्वकार्येषु जपेन्मन्त्री वरानने ॥

**Colophon :**

इत्याकाशभैरवकल्पे शब्दाकर्षणीमन्त्रो नाम द्विचत्वारिंशोऽध्यायः ॥

---

## No. 8090. शरभकालिकाप्रत्यङ्गिरागमः.

## ŚARABHAKĀLIKĀPRATYAṄGIRĀGAMAḤ.

Pages, 42. Lines, 16 on a page.

Begins on fol. 48*a* of the MS. described under No. 7739.

On the details connected with the repetition of the Mantra addressed to Pratyaṅgirā. This Mantra is considered to have the power of curing various kinds of fever.

Contains the following Paṭalas, of which the 9th only is incomplete :—

२. शीतज्वरविनाशनम्.
३. ज्वरनाशयन्त्रम्.
४. सन्निपातनाशनबीजयन्त्रम्.
५. चातुर्थिकज्वरनाशनयन्त्रम्.
६. रोगनाशनयन्त्रराजः.
७. कृत्रिमनाशनयन्त्रम्.
८. कृत्रिमरोगनाशनप्रयोगः.
९. भूतकृत्यनिवारणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अत्यन्तभीकरं रूपं महोग्रं श्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

* * * *

ईश्वर उवाच—

शीतज्वरविनाशं च मन्त्रं शृणु कुलेश्वरि ।
तारं मायात्रयं चैव पाशान्तरितमेव च ॥
सुधाबीजाष्टकं लिख्य अङ्कुशं बीजमालिखेत् ।
पुनश्श्रीबीजमालिख्य गुणसङ्ख्यानमेव च ॥

* * * *

**Colophon:**

इति शरभकालिकातन्त्रे द्वितीयः पटलः ॥

**End:**

इति शरभकालिकातन्त्रे नवमः पटलः ॥
काशान् साक्षिमयूरपिञ्छबृहतीयुग्मे च राजीयुतं
निम्बार्कस्य च पत्रमेवमहिराट्चर्मापि तद्यद्यदा ।
शृङ्गश्वानडुह(द)जोर्णाविमपि गोशृङ्गवेणुत्वचां
धूमं देवि शृणुष्व भूतहरणं बेतालपैशाचहृत् ॥

* * * *

एवं तु सप्तरात्रं तु पक्षाद्वा भूतनाशनम् ।
तस्य भूतस्य मन्त्रं तु वक्ष्यामि कुलसुन्दरि ॥

---

No. **8091.** शरभकालिकाप्रत्यङ्गिरागमः.

ŚARABHAKĀLIKĀPRATYAṄGIRĀGAMAḤ.

Pages, 34. Lines, 20 on a page.

Begins on fol. 1*b* of the MS described under No. 7739.

In addition to the nine Paṭalas mentioned under the previous number, this MS. contains also the tenth Paṭala dealing with Vaśyayōga.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Same as the above.

See under the previous number for the beginning :

**End:**

ओं आं ग्लौं क्रों भूतांस्तान् भक्ष भक्ष भस्मीकुरु भस्मीकुरु आं क्रों हुं ग्लौं आं क्रों फट् स्वाहा ॥

**Colophon:**

इति श्रीशरभकालिकाप्रत्यङ्गिरागमे सर्वतन्त्रराजोत्तमोत्तमे नवमः फटलः ॥

ज्वलज्जिह्वासमायुक्तं महोग्रं श्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

पार्वत्युवाच—

नमस्ते करुणासिन्धो नमः पन्नगकङ्कण ।
अधुना वश्ययोगं च वद मे करुणाकर ॥

* * * *

षट्कोणबीजमालिख्य कोणसन्धौ तु साधकः ।
मायाबीजं कोणयोश्च शूल एव तु संलिखेत् ॥

---

## No. 8092. शरभमन्त्रकल्पः.

## ŚARABHAMANTRAKALPAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 39*a* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa 38*a*, shown among the other works therein.

Complete.

On the details connected with the repetition of the Mantra addressed to Śarabha.

**Beginning:**

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम्।
रक्तशुक्लप्रभामिश्रमगम्यं त्रैपुरं महः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीदेव्युवाच—

सर्वज्ञ भगवन् शम्भो शरभेशस्य तत्त्वतः ।
जगत्क्षोभणमन्त्रस्य स्वरूपं वक्तुमर्हसि ॥

शिवः—

अथ शृणु कथयामः प्रार्थ्यमानं मुनीन्द्रै-
रधिगतरिपुलोकानावृतानाधृतास्रात् ।
हरिविधिमुखवीरानप्रमेयानसङ्ख्यान-
पि हरति स योगान् लीलया यत्र तं तत् ।
जगत्क्षोभणमन्त्रस्य ऋषिस्तत्पुरुषेश्वरः ।
खं बीजं फट् ततश्शक्तिर्विनियोगो विनिग्रहे ॥

**End:**

किमत्र बहुनोक्तेन वक्ष्याम्यार्ये यथातथम् ।
मन्त्रस्मरणमात्रेण शरभेशो भवेत्स्वयम् ॥

**Colophon:**

इत्याकाशभैरवकल्पे एकत्रिंशोऽध्यायः ॥

---

No. **8093.** शरभमन्त्रकल्पः.

ŚARABHAMANTRAKALPAḤ.

**Page,** 1. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 2854.
Complete.
Similar to the above.

**Beginning:**

स्थित्वा शिवाग्रतो धीमानयुतं विजितेन्द्रियः ।
दशांशं तर्पयेद्दिक्षु रसैर्हुत्वा पयो गवाम् ॥
सिद्धमन्त्रं प्रकुर्वीत प्रयोगात् कल्पचोदितात् ।
मन्त्रोद्धारमथेदानीं शृणुष्वेकाग्रमानसः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तारमुक्त्वाथ खें खां खं फट् प्राणग्रहासिने वदन् ।
शब्दं हुं फट् सर्वशत्रु पश्चात्संहारिणे पदम् ॥

**End:**

राजाय वर्मे फट् स्वाहेत्यन्तं षट्त्रिंशदक्षरम् ।
मन्त्रं लब्ध्वा गुरोः पार्श्वे पश्चान्मन्त्रं जपेन्नरः ॥
एतन्मन्त्रं कवचोक्तयन्त्रे विलिखेत् ॥

---

## No. 8094. शरभमन्त्रकल्पः.
## ŚARABHAMANTRAKALPAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 40*a* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa 3*a*, shown among the other works therein.

Complete.

Similar to the above.

**Beginning:**

देवदेव महाभाग गिरीश जगतां पते ।
त्राहि मां दयया नाथ सच्चिदानन्द शाश्वत ॥
मन्त्राणामपि यत्सारं सर्वलोकैकरक्षणम् ।
रक्षणं सर्वजन्तूनां ब्रूहि मे तद्विभो मनुम् ॥

* * * *

शरभेश्वरमन्त्रस्य ऋषिः कालाग्निरुद्रकः ।
छन्दस्तु जगती देवो भगवान् शरभेश्वरः ॥
खङ्कारं बीजमित्युक्तं स्वाहा शक्तिरतः परम् ।
स्वेच्छाप्रयोगसिद्ध्यर्थे विनियोगस्तथाम्बि ॥

**End:**

षट्सप्तकोष्ठेषु विलिख्य शारभं रेखाग्रशूलं च तदग्रसाध्यकम् ।
बाह्ये तु मायावृततारवेष्टितं जयाधिकं साधितुमाशु चक्रम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इत्याकाशभैरवकल्पे षोडशोध्यायः ॥

---

No. **8095.** शरभमन्त्रविषयः.

ŚARABHAMANTRAVIṢAYAḤ.

Pages, 6. Lines, 19 on a page.

Begins on fol. 10*a* of the MS. described under No. 2886.

Adhyāyas 16 to 18 in the Aghōrakalpa.

Contains the Mantra, Yantra, Aṣṭaka, Stuti, Vidvēṣamantra, Vidhi, etc., relating to the deity, Śarabha.

**Beginning :**

अघोरकल्पं वक्ष्यामि शृणु त्वं शैलकन्यके ।
महापातककोटीनां भञ्जनं स्मृतिमात्रतः ॥
भूतप्रेतपिशाचादिनिग्रहे कपिरःट्रता(ण्मितम्) ।
भूतादिवश्यकरणं व्याधीनामपि भञ्जनम् ॥
अघोरजापिना दुष्टाः पलायन्ते महाग्रहाः ।
संहारनिपुणं शीघ्रं षट् कर्माणि धुरन्धरम् ॥

**End :**

आथर्वणमिमं मन्त्रममोघदुरितापहम् ।
सर्वरक्षाकरं श्रेष्ठं सर्वसौभाग्यदायकम् ॥
एतद्यन्त्रं समालिख्य हैमके पट्टके शुभे ।
विधिनाराधयेत्सद्यः सर्वत्र विजयी भवेत् ॥

**Colophon :**

इति अष्टादशोऽध्यायः ॥

---

No. **8096.** शरभमालामन्त्रकल्पः.

ŚARABHAMĀLĀMANTRAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 5660.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

On the details connected with the repetition of the Śarabhamālāmantra.

**Beginning:**

जगत्क्षोभिणिमालामन्त्रस्य ऋषिस्तत्पुरुषेश्वरः ।
तथातिजगती छन्दो देवता शरभेश्वरः ॥
खं बीजं फट् ततश्शक्तिः विनियोगस्तु निग्रहे ।

* * * *

ओं नमो भगवते विश्वेश्वराय पञ्चमुखभञ्जनाय प्रणतार्तिविनाशनाय उद्दण्डकोलाहलाय ।

**End:**

रूपं जनय जनय विज्ञानं धावय धावय ओं खें श्रीं ह्रीं क्लीं ओं अभिवृद्धिं देहि स्वाहा । . . . . . . . . . . .

* * * *

यदसाध्यं युगे सर्वे साध्यं योगे वरानने ।
मन्त्रस्मरणमात्रेण शरभेशो भवेत्स्वयम् ॥

**Colophon:**

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे [प्रत्य]उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवकल्पे जगत्क्षोभिणीमालामन्त्रं नाम त्रयस्त्रिंशोऽध्यायः ॥

No. **8097.** शरभसालुवमन्त्रकल्पः.

ŚARABHASĀLUVAMANTRAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 23*b* of the MS. described under No. 5600, wherein this has been omitted to be shown among the other works.

Complete.

On the details connected with the repetition of the Mantra addressed to Śarabhasāluva-pakṣirāja.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

पार्वत्युवाच—

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
मया श्रुताः कोटिकोटिभेदाः पूर्वमनुत्तमाः ॥
इदानीं श्रोतुमिच्छामि साळुवं मन्त्रमुत्तमम् ।

* * * *

षट्कोणं विलिखेन्मध्ये साध्यनाम समालिखेत् ।
तद्यन्त्रोपरि संविश्य साध्याकारं पुरो भुवि ॥

**End:**

आरभ्याष्टमिपर्यन्तं समाप्ते होमकर्मणि ।
अष्टोत्तरशतं हुत्वा अष्टोत्तरसहस्रकम् ॥
एवं प्रतिदिनं कृत्वा मासान्ते शत्रुरेव(त्रवोऽपि)च ।
गजान्त्येत्प(द्यैः प)र्यद्श्चैव(टन्तोऽपि) गच्छन्ति शिवशासनम् ॥

---

No. 8098. शरभसाळुवमन्त्रकल्पः.

SARABHASĀLUVAMANTRAKALPAḤ.

Pages, 10. Lines, 16 on a page.

Begins on fol. 84*a* of the MS. described under No. 424.

Complete.

Similar to the above; forms a portion of Vātūlāgama.

**Beginning:**

शृण्वन्तु ऋषयस्सर्वे साळुवस्य महात्मनः ।
तस्य दर्शनमात्रेण पलायन्ते च शत्रवः ॥

* * * *

जपस्य विधिमाचक्ष्व पुरश्चरणकर्मणा ।
जपसङ्ख्याश्च होमश्च केन द्रव्येण तर्पणम् ॥

**End:**

हुनेच्च विधिवद्यन्त्रं कुण्डे यन्त्रं विलिख्य च ।
त्रिदिनान्ते च विद्वेषं शत्रूणाञ्च परस्परम् ॥

**Colophon:**

इति वातूलाख्ये दिव्यागमे ब्रह्माणं प्रति उमामहेश्वरसंवादे पक्षिराजसाल्वतन्त्रे प्रतिपक्षसङ्घदलने द्वितीयः पटलः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8099. शरभसाल्वयन्त्रोद्धारः.

## ŚARABHAŚĀLVAYANTRŌDDHĀRAḤ.

**Pages, 5. Lines, 5 on a page.**

Begins on fol. 51*a* of the MS. described under No. 5660, wherein this has been omitted to be shown among the other works

Complete.

On the method of drawing the Śarabhaśālva Yantra

**Beginning:**

त्रिकोणे लिखिते पूर्वे तद्बाह्यं तु दलद्वयम् ।
द्वादशारं तु तद्बाह्ये . . . . . . . . ॥
. . . . . षड्दशान्ते शरभमनुमथो सप्तकं सप्तकं च ।
ओङ्कारं तस्य बाह्ये तदनु परिवृतं साध्यमाकर्षयन्तम् ॥

**End:**

यस्त्वा कृत्ये च काले च त्वन्ते गच्छ पुनर्नवे ।
आरा कृत्ये स्मृत्ये नाशय सर्वाश्च यातुधान्यः ॥

---

## No. 8100. शरभेश्वरयन्त्रम्.

## ŚARABHĒŚVARAYANTRAM.

**Pages, 3. Lines, 19 on a page.**

Begins on fol 40*a* of the MS. described under No. 2886, and is included in Ākāśabhairavakalpa 38*a*, shown among the other works

Complete. Forms the 18th Adhyāya of Ākāśabhairavakalpa.

On the method of drawing the Śarabhēśvara Yantra.

**Beginning:**

अस्य(थ)यन्त्रम् ।

वकारं पूर्वमालिख्य तद्बाह्ये वर्तुलं लिखेत् ।
तद्बाह्ये चतुरश्रं च तद्बाह्येऽष्टदलं लिखेत् ॥
तद्बाह्ये षोडशारञ्च तदग्रे वृत्तमालिखेत् ।
तदग्रे पञ्चकोणं च ठङ्कारे साध्यनामकम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

एतद्यन्त्रं समालिख्य हैमके पट्टके शुभे ।
विधिना धारयेद्योऽयं सर्वत्र विजयी भवेत् ॥

**Colophon:**

इत्याकाशभैरवकल्पे शरभास्त्रमन्त्रप्रयोगो नाम अष्टादशोऽध्यायः ॥

---

No. 8101. शाबरचिन्तामणिः.

ŚĀBARACINTĀMAṆIḤ.

**Pages**, 52. Lines, 18 on a page.

Begins on fol. 91*a* of the MS. described under No. 5586.

Complete.

Gives the details connected with certain Mantras composed in Sanskrit mixed up with the Dravidian languages, and also deals with the manner of repeating them.

The author of the work seems to be Ādinātha; but in the colophons to Paṭalas 3 to 9 the authorship is ascribed to Nityanātha or Nityanāthasiddha. The vernacular rendering of the Mantras seems to have been done by Ādinātha's five disciples who were natives of Cōla, Kērala, Karṇāṭa, Āndhra and Ghūrjara countries.

Contains the following Paṭalas:—

१. शाबरचिन्तामणिमन्त्रषट्कर्मनिरूपणम्.
२. शाबराचिन्तामणिषट्कर्मप्रयोगः.
३. संमोहनविद्याशाबरमन्त्रचिन्तामणिः.
४. वशीकरणशाबरमन्त्रः.
५. उच्चाटनशाबरमन्त्रः.
६. केरलान्ध्रघूर्जरमन्त्रभेदः.
७. विद्वेषणशाबरमन्त्रः.
८. स्तम्भनशाबरमन्त्रः.
९. आकर्षणशाबरमन्त्रः.
१०. गौडीमारणशाबरमन्त्रचिन्तामणि.

**Beginning:**

विश्वेश्वरसरस्वत्या गुरोश्शिष्यं तपोधनम् ।
नृसिंहध्यानसम्पन्नं वामनाख्यं नमाम्यहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकराम्भोजयुगले कस्तूरीपङ्कसङ्कुले ।
नखैर्लिखन्तं चित्राणि श्रीनृसिंहमहं भजे ॥

ओङ्कारवाचकं साक्षान्महोग्रश्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

मन्त्रात्मकं मन्त्रमूर्तिं महोग्रश्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

* * * *

पार्वत्युवाच—

भूसुरार्चित भूतेश शेषकङ्कण शङ्कर ।
लङ्केशार्चितपादाब्ज नमस्ते शाङ्करीपते ॥

* * * *

भूतले शाबरं मन्त्रं वर्तते साधकं विना ।
पठासि (हठात्सि)द्धिकरी विद्या पावनं वद मे प्रभो ॥

ईश्वर उवाच—

मम मानसपुत्रोऽस्ति मत्स्येन्द्रेभ्यो महाबलः ।
चोलकेरलकर्णाटकान्ध्रघूर्जरदेशिकः ॥

शिष्यपञ्चकसंयुक्तस्तपस्तेपे सुदारुणम् ।
तत्र प्रसन्नो भगवान् हंसरूपी परात्परः ॥

हंस उवाच—

किमस्ति काङ्क्षितं ब्रूहि आदिनाथ परात्परम् ।
असाध्यमपि योगीन्द्र वदाम्येतद्व्रतं मम ॥

आदिनाथ उवाच—

प्रत्येकं मन्त्रशास्त्रं तु कौलाचारमतानुगम् ।
कौलाचारविहीनं तु कल्पयाम्यहमादरात् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कटाक्षमस्ति देवेश तन्मन्त्रागममादरात् ।
पाठान्मन्त्रोक्तिफलदं कुरु चिन्मयविग्रह ॥
इत्युक्तं तु महेशस्तु तदादिश्य पिता ययौ ।
आदिनाथस्तु गिरिजे शिष्यैर(ष्यान)ध्यापितं(पयन्) मनुम् ॥
तस्य तस्यैव भाषायां मन्त्रं तज्जपलक्षणम् ।
प्रयोगं चोपसंहारमुक्तवानपि पार्वति ॥
षट् प्रयोगान् क्रमेणैव देवतामन्त्रमादरात् ।

* * * *

आदौ तद्देवतां वक्ष्ये मत्स्येन्द्रोक्तिसुसिद्धये ।

**Colophon :**

इति श्रीपार्वतीपुत्रादिनाथविरचिते पञ्चद्राविडशाबरचिन्तामणिर्नाम प्रथमः पटलः ॥

**End :**

बलिं दद्यात् कुक्कुटं च मद्यमांसादिकं तथा ।
तथैव प्रेतभूमौ तु धैर्यबुद्धिसमान्वितम् ॥

* * * *

**Colophon :**

इति श्रीपार्वतीपुत्रादिनाथविरचिते शाबरचिन्तामणिर्नाम दशमपटलः ॥

---

## No. 8102. शारदातिलकम्.

## ŚĀRADĀTILAKAM.

**Substance**, paper. Size, $9\frac{1}{8} \times 7\frac{1}{8}$ inches. Pages, 466. **Lines, 16 on a page.** Character, Telugu. Condition, good. **Appearance**, new.

Complete.

Deals with the ritualistic details connected with various Mantras and also gives the method of repeating them.

By Lakṣmaṇadēśika, son of Śrīkṛṣṇadēśika who is the son of Vijaya also called Acāryapaṇḍita and grandson of Mahāraṇa or Mahāvana or Mahābala.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following Paṭalas :—

१. उपोद्घातः.
२. वर्णाभिव्यक्ति etc. (देवतास्वरूपमन्त्रजननादि).
३. दीक्षाक्रमः.
४. दीक्षाविधिः.
५. अग्निसंस्कारहोमः.
६. वर्णतनुनिरूपणम्.
७. वाग्देवीपूजाविधिः.
८. श्रीमन्त्रनिरूपणम्.
९. भुवनेश्वरीमन्त्रविधानम्.
१०. त्वरितामन्त्रविधानम्.
११. दुर्गामन्त्रविधानम्.
१२. त्रिपुरामहाविद्या.
१३. गणपतिमन्त्रविधिः.
१४. सोममन्त्रविधिः.
१५. वैष्णवमहामन्त्रविधिः.
१६. नारसिंहमन्त्रविधिः.
१७. जगन्मूलमन्त्रविधिः.
१८. महेशमन्त्रविधिः.
१९. मन्त्ररत्नकथनम्.
२०. अघोरास्त्रमन्त्रविधिः.
२१. गायत्र्याग्नेयास्त्रमन्त्रविधिः.
२२. कृत्यास्त्रमन्त्रविधिः.
२३. त्र्यम्बकमन्त्रविधिः.
२४. यन्त्रभेदकथनम्.
२५. यमादियोगकथनम्.

**Beginning :**

नित्यानन्दवपुर्निरन्तरमिलत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कवदनं वाचामधीशं महः ॥

* * * *

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम् ।
धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम् ॥
शब्दार्थसृष्टिर्मुनिभिश्छन्दोभिर्दैवतैस्सह ।
विधिश्च मन्त्रयन्त्राणां तन्त्रेऽस्मिन्नभिधीयते ॥

* * * *

**Colophon :**

इति श्रीशारदातिलके प्रथमः पटलस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

दिक्कालादिविवर्जिते परशिवे चैतन्यमात्रात्मके
शून्ये कारणपञ्चकस्य निलये(यं)नीते निरालम्बने ।
आत्मानं विनिवेश्य निश्चलधिया निर्लीनसर्वेन्द्रियो
योगी योगफलं प्रयाति सुलभं नित्योदितं निष्क्रियम् ॥

महारणाय प्रणतोऽस्मि तस्मै संविल्लतालिङ्गनशीतलाय ।
येनार्पितं मुक्तिफलं विपक्वमात्मादि(म्नाय)शाखाभिरुपाश्रितेभ्यः ॥

तस्मादभूदखिलदेशिकवारणेन्द्रः
षट्कर्मसागरविहारविनोदशीलः ।
यस्य त्रिलोक(विततं)विजयाभिधान-
माचार्यपण्डित इति प्रथयन्ति सन्तः ॥

तन्नन्दनो देशिकदेशिकोऽभूत्
श्रीकृष्ण इत्यभ्युदितप्रभावः ।
यत्पादकारुण्यसुधाभिषेकां
लक्ष्मीं परामश्नुवते कृतार्थाः ॥

आश्चर्यविद्याविभवस्य तस्य जातः प्रभोर्लक्ष्मणदेशिकेन्द्रः ।
विद्यास्वशेषासु कलासु सर्वास्वति(पि)प्रभां(थां)यो महतीं प्रपेदे ॥

आदाय सारमखिलं निखिलागमेभ्यश्श्रीशारदातिलकनाम चकार तन्त्रम् ।
प्राज्ञस्स एष पटलैरिह तत्त्वसङ्ख्यैः प्रीतिप्रदानविधये विदुषां चिराय ॥

अनाद्यन्ता शम्भोर्वपुषि कलितार्धेन वपुषा
जगद्रूपं शश्वत्सृजति महनीयामपि गिरम् ।
सदर्था शब्दार्थस्तनभरनता शङ्करवधूः
भवद्भूत्यै भूयात् भवजनितदुःखौघशमनी ॥

**Colophon :**

इति शारदातिलके पञ्चविंशः पटलः समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8103. शारदातिलकम्.

## ŚĀRADĀTILAKAM.

**Pages, 24.** Lines, **22** on a page.

Begins on fol. 56*a* of the MS. described under No. 5507.

Incomplete. Paṭalas 1 and 2 only.

**Same as** the above.

---

## No. 8104. शारदातिलकम्.

## ŚĀRADĀTILAKAM.

**Substance,** palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 378. **Lines, 6** on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

**Complete.**

**Same as** the above.

---

## No. 8105. शारदातिलकव्याख्यानम्.

## ŚĀRADĀTILAKAVYĀKHYĀNAM.

**Substance,** paper. Size, $14\frac{1}{8} \times 9$ inches. Pages, 684. **Lines, 25** on a page. Character, Telugu. Condition, injured. **Appearance,** new.

A commentary by Bhaṭṭarāghava. The commentary is called Padārthādarśa.

Breaks off in the middle of the genealogy of the commentator given at the end of the commentary on the last Paṭala.

**Beginning :**

श्रीकण्ठं निजताण्डवप्रवणताप्रोद्दाममोहोदयं
पश्यन्त्या कुतुकाद्भुतप्रियतया सञ्जातभावं मुहुः ।
मन्दान्दोलितदुग्धसिन्धुलहरीलीलारसं लोचन-
प्रान्तोन्मीलनमातनोतु भवतां भूतिं भवान्याश्शुभम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शारदातिलके तन्त्रे गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं राघवेण विरच्यते ।

* * * *

अथेश्वरस्सर्वा अपि श्रुतीः भवपाशबद्धानां जन्तूनां स्वर्गाय मुक्तये च उपदिशति स्म । अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन तदर्थप्रतिपादकत्वेन च प्रामाण्यमिति प्रसिद्धतरम् । अस्यास्त्वागमस्मृतेः कथं तन्मूलकत्वम् ? ।

**End:**

तन्त्रार्थमुपसंहरन्नाशिषां युगलं करोति—अनादीति । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि चेति भगवत्पतञ्जलिवचनादिति शिवम् ॥

पुरं गोदावर्या विलसदुपकण्ठे जनततं
जनस्थानं नाम प्रथितमभवद्दक्षिणदिशि ।
महाराष्ट्रे देशे जनकतनयालक्ष्मणवृतः
पुरा रामो यस्मिन्नवसदतितुष्टेन मनसा ॥

तस्मिन् पुरे ब्राह्मणसत्तमानां कुले वि(शु)द्धे महति प्रसिद्धे ।
श्रीभट्टरामेश्वर इत्युदारो गुणैरभूद्वादिमहेभसिंहः ॥
तस्मादमुन्नाक्षण(भूत्तीक्ष्ण)कुशाग्रबुद्धिः श्रीभट्टपृथ्वीधरनामधेयः ।
अनेकधाध्यापयदेष माद(णवान्)वेदान्तशास्त्रं फणिभाषितानि ॥
[भू]गीर्वाणाचाया(र्ये)वर्यो दिवि कृतवसतिर्यद्भयादेव शङ्के
शेषः पातालमूलं सपदि(गुरु)वरा(देव)भू(भी)त्या विवेश ।
अन्येषां कैव वार्ता कृतकृतकवचश्चापलानां कृतं तैः
सम्यक् शक्योऽस्य वक्तुं न हि वदनशतैरप्यशेषप्रभावः ॥

* * * *

आयुर्वेदनिधिः कलासु कुशलः कामार्थशास्त्रे गुरुः
सङ्गीते निपुणस्सदागमनिधेः पारं प्रयातः परम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीदुर्गे गणनायक ग्रहगुरो गोविन्द गौरीपते
युष्मानर्थितया नतेन शिरसा सोऽयं प्रबद्धोऽञ्जलिः ॥
मन्त्रार्थादिविवेचने यदि भवेत्स्वं बालिशत्वं भ्रमात्
काचित्कं मम भक्तिभावितहृदो दासस्य तत् क्षम्यताम् ।

* * * *

कायस्था इव वाचकाः कति चन प्रायेण मूका इति
श्रोतारस्त्वपरे शुका इव परे साधुप्रलापाः पुनः ।
ग्रन्थग्रन्थिविवेचनैकचतुरा ये कोविदाः केवलं
द्वित्रास्ते तदुदीरिताच(व)गतयो विज्ञा वपुः(बभुः) पश्चषाः ॥

## No. 8106. शारदातिलकव्याख्या.
## ŚĀRADĀTILAKAVYĀKHYĀ.

Pages, 135. Lines, 21 on a page.

Begins on fol. 69*a* of the MS. described under No. 5507.

Same as the above.

Breaks off in the third Paṭala.

## No. 8107. शास्तृमन्त्रकल्पः.
## ŚĀSTṚMANTRAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 2854.

Complete. 47th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the Mantras addressed to Śāstṛ and on the manner of repeating them.

**Beginning:**

श्रीशिव उवाच—

श्रृणु गुह्यं महामन्त्रं महाशास्तुर्वेदाम्यहम् ।
भोगमोक्षप्रदं दिव्यं पुत्रसंपत्प्रदं परम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

ऋषिरस्यार्धनारीशः छन्दोऽनुष्टुप् ततः परम् ।
देवता तु महाशास्ता देवो हरिहरात्मजः ॥
मायावर्णन्तु बीजं स्यात् रमा शक्तिरतः परम् ।
मम सर्वार्थसिद्ध्यर्थे विनियोगो वरानने ॥

**End:**

सम्पाद्य(म्पद)न्नसमृद्धौ च प्रसादेऽनुग्रहे परे ।
तम्मे कुरु कुरु स्वाहेत्यखिलं प्रजपेद्बुधः ॥

सहक्षमलवरयूं हसक्षमलवरयूं आनन्दनाथायानन्दवल्लीवल्लभाय स्वाहा ॥

**Colophon:**

इत्याकाशभैरवकल्पे महाशास्तृमन्त्रो नाम सप्तचत्वारिंशोऽध्यायः ॥

---

## No. 8108. शुद्धदक्षिणामूर्तिमन्त्रोद्धारः.

## ŚUDDHADAKṢIṆĀMŪRTIMANTRŌDDHĀRAḤ.

**Pages**, 8. Lines, 16 on a page.

Begins on fol. 248*b* of the MS. described under No. 424.

Complete.

On the manner of pronouncing the Mantra addressed to Dakṣiṇāmūrti and on the rites to be observed as preliminary to the repetition of that Mantra. The Mantra here is unmixed with the syllables relating to हंस, मेधा, etc., and is hence called शुद्ध.

**Beginning:**

ओं ब्रह्मायशेषेत्यादि ओं क्लीं पशु हुं फट् इति पाशुपतास्त्रेणाङ्गुलिन्यासकरन्यासकरशोधनव्यापकत्रयतालत्रयदिग्बन्धनाग्निप्राकारान् विधाय ह्र ह्र हे ति मन्त्रत्रयेण मूलाधारहृदयभ्रूमध्यगतसुषुम्नानाडीपर्वत्रयं भङ्क्त्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

आदौ वेदादिमुच्चार्य स्वराद्यं सविसर्जनम् ।
पश्चार्णे तत उद्धृत्य पुनरंसविसर्गकम् ॥
अन्ते समुद्धरेत्तारं मनुरेवं नवाक्षरः ।
ओं अः नमश्शिवाय अः ओं मनुः ॥

---

## No. 8109. शूलिनीदुर्गाविधानम्.
## ŚŪLINĪDURGĀVIDHĀNAM.

Pages, 150. Lines, 17 on a page.

Begins on fol 1*a* of the MS. described under No. 7784.

On the ritualistic details connected with the Śūlinīdurgāmantra and on the manner of repeating the Mantra.

Contains the following Upadēśas:—

१. दुर्गाक्रियाविधिः.
२. विविधधूपाञ्जनम्.
३. ध्यानभेदः.
४. कालनिर्णयविधानम्.
५. नानादैवतयन्त्रदोषारिष्टानिवारणम्.
६. हिरण्येश्वरीविधानम्.
७. सिद्धिलयभावनाविधानम्.
८. एकादशावस्थाविधिः.
९. सर्वोच्चाटनम्.
१०. रत्नबीजविधिः.
११. क्रियोत्कर्षः.
१२. नानाविवादविजयः.
१३. विश्वरूपस्तुतिः.
१४. क्रियाविचित्रम्.
१५. मनुवेधरहस्यम्.
१६. क्रियामोघम्.

**Beginning:**

अस्य श्रीशूलिनीदिग्बन्धनमालामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीशूलिनीदुर्गा देवता । . . . . . . . . . . . .

अथ ते शूलिनीदेव्यास्सुमुखीकरणस्तुतिम् ।
प्रवक्ष्यामि समासेन सर्वकामार्थसिद्धये ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति दुर्गाक्रियाविधिर्नाम प्रथमोपदेशः ॥

**End:**

दशदानं विशेषेण देवताविघ्नशान्तये ।
एवमन्योन्ययुक्तानि दानानि निखिलानि च ॥

**Colophon:**

इति श्रीमहाशूलिनीदुर्गाविधाने क्रियामोघं नाम षोडशोपदेशः ॥

---

No. 8110. शूलिनीदुर्गाविधानम्.
ŚŪLINĪDURGĀVIDHĀNAM.

**Pages, 12.** Lines, 19 on a page.

Begins on fol. 63*a* of the MS. described under No. 2886.

Upadēśas 4 to 13 in the Ākāśabhairavakalpa. These Upadēśas are not in the same order as in the last

Similar to the above.

**Beginning:**

श्रीशूलिनीदुर्गाकल्पविशेषो लिख्यते ।

शिव उवाच—

श्रीमहाशूलिनीदेव्या यन्त्रयन्त्रार्णलक्षणम् ।
भूतावेशाविकारांश्च तन्निवारणलक्षणम् ॥
अविस्तृतमसङ्कोचमशेषार्थफलप्रदम् ।
ऋजु तच्छृणु वक्ष्यामि गोपनीयं जगद्धितम् ॥

**Colophon :**

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाक्रियाविधाने चतुर्थ उपदेशः ॥

**End:**

इति सुमतिरशेषदेवतानां भजनविधानविशेषसूक्ष्मसूक्ष्मम् ।
शिवगुरुकरुणाकटाक्षलब्धं स्वमधिकरोतु शिवैक्यभाग्यसिद्ध्यै ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति महाशैवतन्त्रे पुरश्चर्या प्रकरणविधिर्नाम त्रयोदश उपदेशः ॥

---

## No. 8111. शूलिनीप्राणयन्त्रोद्धारः.
## ŚŪLINĪPRĀṆAYANTRŌDDHĀRAḤ.

**Page, 1.** Lines, 19 on a page.

Begins on fol. 16*b* of the MS. described under No. 2886.

Complete.

On the manner of drawing the Yantra and filling it up with the syllables relating thereto. The Yantra is considered to have the power of taking away the life of one's enemies.

**Beginning :**

रत्नक्ष्माकोणभूतस्थलशशिहृदये मूलमन्त्रं द्विवारं
साध्यं मर्मस्वनङ्गप्रणवहृदि रवौ वेदसन्धौ हुताशम् ।
शूलं रेखाग्रदेशे निखिललिपिवृतं सर्वदोषापहारं
क्षिप्रारोग्या(दि)सिद्धिप्रदमणिविजयं शूलिनीप्राणयन्त्रम् ॥

**End :**

तस्य परितः अग्निबीजं विलिखेत् । वदमन्त्रः । सारकं भागचर्माणं प्रतिकारक्रियाकारः स्वाहा ज्वल ज्वल दुष्टग्रहशूलिनि फट् हुं ॥

---

## No. 8112. शूलिनीमन्त्रकल्पः.
## ŚŪLINĪMANTRAKALPAḤ.

**Pages, 9.** Lines, 17 on a page.

Begins on fol. 83*b* of the MS. described under No. 5574.

Complete. Contains the 6th Upadēśa and the 29th Adhyāya of **Ākāśabhairavakalpa**.

On the details connected with the Śūlinīmantra and on the manner of repeating the Mantra.

**Beginning :**

अथ वक्ष्यामि शूलिन्या मन्त्रं दोषापहारकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वस्तिदं सर्वलोकानां कार्यसिद्ध्येकदायकम् ॥

* * * *

शूलिनि ज्वालामालिनि महाबलपराक्रमे ज्वल ज्वल प्रज्वल ।

* * * *

**Colophon**:

इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे अतिरहस्ये प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाक्रियाविधाने दोषापहारो नाम षष्ठ उपदेशः ॥

**End**:

मध्ये शक्तिं [ह्रीं] वसुदललसच्छूलिनीवर्णयुग्मं
किञ्जल्काद्यं महिषमथिनीमन्त्रवर्णं बहिश्च ।
त्रिष्टुब्दुर्गालिपिभिरभि(परि)वृतं भूपुराख्येऽन्तरस्था
दुर्गाबीजं त्वभिधमभितः शूलिनीयन्त्रमेतत् ॥

**Colophon**:

इति श्रीआकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवपक्षिराजकल्पे दुर्गाप्रकरणं नामैकोनत्रिंशोऽध्यायः ॥

---

## No. 8113. शूलिनीमन्त्रकल्पः.

## ŚŪLINĪMANTRAKALPAḤ.

**Pages**, 7. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 29

Incomplete.

**Similar to the above**

**Beginning**:

श्रीदेव्युवाच—

श्रीमत्सकलकल्याणबोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रवदस्व दयानिधे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईश्वर उवाच—

श्रृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ॥

* * * *

ऋष्यादिकं यथामूलं विशेषात्कर्मचिन्तितम् ।

प्रतिक्रियार्थसिद्ध्यर्थे विनियोगः कराङ्गयोः ॥

**End:**

ब्रह्मराक्षसबेतालभीमोन्मत्तमहाग्रहम्(ाः) ।

मि(भू)तापस्मारकुष्ठादिपापाविक्रमखेचराः ॥

ज्वालामुखीतमोहाराप्रेतपैशाचिका ग्रहाः ।

सिंहेभमहिषव्याघ्रऋक्षवानरसौकराः ॥

---

## No. 8114. शूलिनीमन्त्रकल्पः.

## ŚŪLINĪMANTRAKALPAḤ.

**Pages, 3.** Lines, 18 on a page.

Begins on fol. 146*a* of the MS. described under **No. 5673,** wherein this is given as Śūlinīkavaca.

Complete.

Similar to the above.

**Beginning:**

अथातस्सम्प्रवक्ष्यामि शूलिनीं तु विशेषतः ।

समाहितेन मनसा श्रृणु सर्वं वरानने ॥

ब्रह्मा श्रीशूलिनीदुर्गामन्त्रस्य ऋषिरुच्यते ।

गायत्री छन्द इत्युक्तो(क्तं)देवता शूलिनीश्वरी ॥

दुङ्कारं बीजमित्युक्तं स्थाणुश्शक्तिस्ततः परम् ।

स्वेच्छाप्रयोगसिद्ध्यर्थे विनियोगस्तथाम्बिके ॥

**End:**

शूलिनीयं महामन्त्रं दुर्वारं सर्वजन्तुभिः ।

गुह्याद्गुह्यतरं श्रेष्ठं गोपनीयं प्रयत्नतः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बीजाक्षरेण प्राणायामत्रयं कृत्वा मम सकलविद्यासिद्ध्यर्थे जपे वि-
नियोगः । हुं सामिति षडङ्गन्यासः ।

अथ ध्यानम्—

हंसारूढं हयग्रीवं दीर्घस्तब्धश्रुतिं हरिम् ।
दधतं पुस्तकं ज्ञानमुद्रां दधतमाश्रये ॥
ह्सौं ह्सौं ॥

---

No. **8115.** शूलिनीयन्त्रम्.

ŚŪLINĪYANTRAM.

**Pages, 5.** Lines, 14 on a page.

Begins on fol. 165*a* of the MS. described under No 5673.

Complete.

On the manner of drawing the Yantra relating to Śūlinīmantra.

**Beginning:**

अथातः संप्रवक्ष्यामि शूलिनीयन्त्रमुत्तमम् ।
समाहितेन मनसा शृणुष्व परमेश्वरि ॥
त्रिकोणं विलिखेत्पूर्वं तद्बहिर्वृत्तमालिखेत् ।
तद्बाह्ये चाष्टपत्रन्तु पुटीकृत्य च भूपुरम् ॥

**End:**

इदं कल्पं मयाख्यातं गुह्याद्गुह्यतरं शुभम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

**Colophon:**

इति श्रीमहादेवविरचिते आकाशभैरवकल्पेऽतिरहस्यशूलिनीदुर्गा कल्पं नामाष्टत्रिंशोऽध्यायः ॥

---

No. **8116.** शूलिनीयन्त्रलक्षणम्.

ŚŪLINĪYANTRALAKṢAṆAM.

**Pages, 5.** Lines, 6 on a page.

Begins on fol. 134*a* of the MS. described under No. 2848.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the measurements to be observed in drawing the Śūlinī-yantra.

**Beginning:**

श्रीशिव. उवाच —

श्रीमहाशूलिनीदेव्या यन्त्रपीठस्य लक्षणम् ।
विशालदीर्घमानञ्च(सावधानं)शृणूच्यते ॥
यन्त्रासनं यन्त्रपीठं पटं पट्टश्च पट्टिका ।
पत्रिका बरिका धात्री फालिका फलका तथा ॥
अङ्गुष्ठपर्वमात्रं स्यात्पीठिकैकाक्षरस्य च ।
एकावरणमन्त्रस्य फलकोऽङ्गुष्ठमात्रकः ॥

**End:**

इतीदं परं शूलिनीदेवतायाः प्रयोगोचिताशेषयन्त्रासनानाम् ।
विशेषेण रेखार्णयुक्तावकाशप्रमाणादिकं संविदन्त्वात्मनाथात् ॥

**Colophon:**

इति श्रीमहाशैवतन्त्रे दुर्गाविश्वपालविधाने पीठिकादिलक्षणं नाम द्वितीयोपदेशः ॥

---

No. **8117.** शूलिनीयन्त्रोद्धारः.

ŚŪLINĪYANTRŌDDHĀRAḤ.

**Page,** 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886, wherein this has been omitted to be shown among the other works.

Complete.

On the method of drawing the Yantra relating to Śūlinī-mantra.

**Beginning:**

एकारे वृत्तबाह्ये निगमसमदले दम्पतिश्चेति चाग्रा-
द्वृत्ताद्बाह्ये दशारे स्मरमणिसहिते यस्तदूर्वादिरान्तम् ।

465

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योनिं योन्यन्तराले शिशिरकरदले शूलिनी युक्तबाह्ये
साध्यं नानावधूनां तनयदमतुलं स्वप्नभोगार्तिवज्रम् ॥

**End:**

त्रिपञ्चकोष्ठे परिलिख्य शूलिनीं मध्ये तु बीजाङ्कितसाध्ययुक्तम् ।
रेखाशिरःकल्पितशूलयुक्तं यन्त्रं महाभूतपिशाचवैरी ॥

---

## No. 8118. शूलिनीयन्त्रोद्धारः.
## ŚŪLINĪYANTRŌDDHĀRAḤ.

**Page**, 1. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 5858.

Complete.

Similar to the above.

**Beginning:**

त्रिपञ्चकोणेषु विलिख्य शूलिनीं ससाध्यनामाङ्कितमन्त्रबीजम् ।
रेखाशिरःकल्पितमन्त्रवैरं यन्त्रं महाभूतपिशाचवैरम् ॥
ओं दुं दुर्गे ज्वल ज्वल शूलिनि दुष्टग्रहं हुं फट् स्वाहा ।
शूलदलमध्ये यं रं [वि]लिखित्वा प्राग्भागे कर्णिकामध्ये पञ्च तत्त्वानि
लिखित्वा लं वं रं यं हं ।

**End:**

दिक्पालबीजान् विलिख्य लं रं शं सं वं यं षं हम् ॥

---

## No. 8119. शूलिनीयन्त्रोद्धारः.
## ŚŪLINĪYANTRŌDDHĀRAḤ.

**Pages**, 5. Lines, 14 on a page.

Begins on fol. 167*a* of the MS. described under No. 5673.

Similar to the above.

**Beginning:**

श्री(त्रि)पञ्चकान्नाम(कोणेषु)विलिख्य शूलिनीं स्वसाध्यनामाङ्कित-
[मन्त्यबीजम् ।
रेखाशिरःकल्पितशूलयुक्तं यन्त्रं महाभूतपिशाचवैरी ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वशीकरणं क्रां क्रीं क्रूं ज्वल ज्वल भूतप्रेतनिवारिणि ईं रीं रूं ज्वरविषसङ्घविमोचनीं हुं फट् स्वाहा ।

**End:**

महादेवीं महादुर्गां चण्डिकां हेमरूपिणीम् ।
ध्यात्वा येगेन मनसा सर्वकामफलप्रदाम् ॥

---

## No. 8120. शैवसिद्धान्तरहस्यम्.

## ŚAIVASIDDHĀNTARAHASYAM.

**Pages**, 6. Lines, 24 on a page.

Begins on fol. 267*b* of the MS. described under No. 7941.

16th Paṭala only.

This Paṭala treats of the several kinds of **Pañcavaktrahanūmanmālāmantra**, and of the effects of repeating those **Mantras**.

**Beginning:**

पापशुद्धिमथो वक्ष्ये पूजाहोमं विना तथा ।
स्मरणादेव तन्त्रस्य पापसङ्घातपञ्जरम् ॥

* * * *

ओं ह्रौं क्ष्रां श्रीं हुं हसौं नमः पञ्चवक्त्राय हनुमते महाबलाय खे खे हुं फट् स्वाह ।

**End:**

राक्षसानपि गन्धर्वान् भूतान् दुष्टग्रहानपि ।
ग्रहानशेषान्निश्शेषान् नाशयेन्नात्र संशयः ॥

**Colophon:**

इति श्रीशैवसिद्धान्तरहस्ये पञ्चवक्त्रहनुमन्मालामन्त्रप्रकारो नाम षोडशः पटलः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8121. श्रीमन्त्रपूजाविधानम्.

## ŚRĪMANTRAPŪJĀVIDHĀNAM.

**Pages,** 4. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 5445, wherein this is shown as Lakṣmīpūjāvidhāna among the other works.

Incomplete.

Forms a portion of Dakṣiṇāmūrtisaṁhitā. Contains the first Paṭala and a portion of the second.

On the details connected with the Pūjā, Yantra, etc., of the Lakṣmīmantra and on the manner of repeating the Mantra.

**Beginning:**

श्रीमच्छ्रीकोशहृदयं पञ्चसिंहासनात्मकम् ।
फलं कल्पलतानां च चारुरत्नस्फुरत्कलाम् ॥

* * * *

श्रीदेव्युवाच—

कृपामूल महादेव कृपयानन्दमन्दिर ।
किं तद्ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥
कथं श्रीसहितं देव श्रीकोशहृदयं कथम् ।
पञ्चसिंहासनैस्सेव्यं कथं कल्पलतात्मकम् ॥
कथं रक्तात्मकं देवि कथमाय[ा]तनात्मकम् ।
कथमाम्नायसंसेव्यं कथं नित्यात्मकं प्रभो ॥

* * * *

षडङ्गादि न्यसेन्मन्त्री हृच्छिरश्च शिखां ततः ।
कवचं नेत्रमस्त्रं च नमस्स्वाहा क्रमेण च ॥
वषड् हुं वौषडन्तं हुं फटिभिस्सह विन्यसेत् ।
अष्टपत्रं लिखेद्यन्त्रं बहिर्भूबिम्बमालिखेत् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चैस्त्रिमधुरैर्हुत्वा पुरश्चारी ततो भवेत् ।
एवं यस्सिद्धमन्त्रस्तु सर्वसाम्राज्यदो भवेत् ॥

**Colophon:**

इति श्रीदक्षिणामूर्तिसंहितायामेकाक्षरीलक्ष्मीपूजाविधानं नाम प्रथमः पटलः ॥

**End:**

महालक्ष्मीर्महादेवि पुर आरभ्य पूजयेत् ।
इन्द्रादयस्तु सम्पूज्या कामिनी . . . . . ॥

---

## No. 8122. श्रीरुद्रयन्त्रोद्धारः.
## ŚRĪRUDRAYANTRŌDDHĀRAḤ.

**Page**, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886, wherein this has been omitted to be shown among the other works.

On the manner of drawing the Yantra relating to Śrīrudramantra.

**Beginning:**

त्रिपञ्चशूलं चतुरश्रकन्तथा मध्ये च साध्यं परितश्च शङ्करम् ।
बहिश्च तारं हुतभुक्समन्वितं श्रीरुद्रयन्त्रं मुनयो वदन्ति ॥

**End:**

सवातवृत्तिम् ऋतुकोणलक्ष्मीं मायाञ्च बाह्यावृततारसाध्यम् ।
आराध्य यन्त्रं प्रजपेत्सहस्रमाकर्षणं चापि सुरासुराणाम् ॥

---

## No. 8123. श्रीविद्याचक्रलेखनप्रकारः.
## ŚRĪVIDYĀCAKRALEKHANAPRAKĀRAḤ.

**Pages**, 2. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 5987, wherein this has been shown as Śrīcakradhyāna among the other works

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the manner of filling up the Śrīcakra with the syllables of the Śrīvidyāmantra.

**Beginning:**

बिन्दौ कामकलां त्रिकोणनिलये तारत्रयं संलिखेत्
अष्टाश्रिष्वनुवर्णमूलमनवो लेख्या दशारद्वये ।
मध्याङ्कादिमनोश्छटा द्विमुनिभिः संवेष्ट्य मन्वश्रके
पत्रेष्वष्टसु तारकाष्टकमिदं लेख्यं सदा सख्यगैः ॥
द्व्यष्टपत्रे स्वराद्यष्टौ त्रिवृत्ते मातृकां लिखेत् ।
चतुरश्रं चतुर्द्वारे दुर्गाविघ्नेशभैरवान् ॥

**End:**

एवं वर्णयुतं चक्रं पूजयित्वा सुधारकः ।
शिवेन समतां याति श्रीविद्यानुग्रहात्परम् ॥

**Colophon:**

इति श्रीचक्रे ध्यानम् ॥

---

No. **8124.** श्रीविद्याचक्रलेखनाविधिः.

ŚRĪVIDYĀCAKRALEKHANAVIDHIḤ.

**Pages, 11.** Lines, 18 on a page.

Begins on fol. 75*a* of the MS. described under No. 5593.

Complete.

Similar to the above.

**Beginning:**

अथ कल्पान्तरोक्तप्रकारेणापि श्रीविद्याचक्रलेखनप्रकारा लिख्यन्ते ।

अथ पुरतो विहाय निजविष्टरात्
अरत्निमवनीमथ समन्त्रक्रमसाधनयुताः ।
अङ्गुलीयमव(ळ)देवभागवसुतोय-
पद्मभूरचयाम चक्रमरुणं सुकेसरम् (?) ॥
देवीस्तुता मे गङ्गावली स्तुतेति प्रदृश्यते ।
मानं श्रीचक्रनिर्माणसूत्रेषु नवसु क्रमात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आद्ये द्वितीयेऽष्टमके नवमे च यथाक्रमम् ।
मार्जयेद्गुणभागांशाद्वृत्तार्थै(र्थे)कत्र चान्यतः ॥

**End:**

भं अं सौः इति चतुरश्रे इति नवचक्रनायकीबीजानि तत्तदावरणात्पुरतो विलिखेत् ॥

**Colophon:**

इति श्रीचक्राक्षरलेखनविधिः सम्पूर्णः ॥

---

No. **8125.** श्रीविद्याचक्रविषयोपन्यासः.

ŚRĪVIDYĀCAKRAVIṢAYŌPANYĀSAḤ.

**Pages,** 3. Lines, 5 on a page.

Begins on fol. 170*a* of the MS. described under No. 673.

Incomplete.

On the form of the Śrīcakra and on the manner of worshipping it.

**Beginning:**

श्रीदेव्युवाच—

नमस्ते जगदाधार लोकानुग्रहकारक ।
पिण्डब्रह्माण्डयोरैक्यं चक्ररूपं वद प्रभो ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि रहस्यं त्रिपुरेश्वरि ।
पिण्डाण्डरूपं श्रीचक्रं ब्रह्माण्डात्मकमीश्वरि ॥
श्रीकण्ठैः शक्तिचक्रैश्च नवभिर्वलयैस्त्रिभिः ।
पद्मद्वयेन संबन्धः श्रीचक्रं शिवयोर्वपुः ॥

**End:**

त्रिकोणरूपिणी शक्तिः बिन्दुरूपः शिवः स्मृतः ।
अविनाभावसंबन्धस्तस्माद्बिन्दुत्रिकोणयोः ॥
एवं विभागमज्ञात्वा श्रीचक्रं यस्समर्चयेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8126. श्रीचक्रविषयोपन्यासः.
## ŚRĪCAKRAVIṢAYŌPANYĀSAḤ.

**Pages**, 5. Lines, 5 on a page.

Begins on fol. 172*a* of the MS. described under No. 673, wherein this has been omitted to be shown among the other works.

Incomplete.

Same as the above.

---

## No. 8127. षण्मुखमन्त्रकल्पः.
## ṢAṆMUKHAMANTRAKALPAḤ.

**Page**, 1. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 2854.

Complete.

Forms the 60th Adhyāya of Ākāśabhairavakalpa.

Deals with the Yantra, Pūjā, etc., in relation to the Mantra addressed to Ṣaṇmukha or Subrahmaṇya and also with the manner of repeating the Mantra.

**Beginning:**

अथ षण्मुखमन्त्रस्य भगवान् कश्यपो ऋषिः ।
त्रिष्टुप् छन्दस्तथा देवी सुब्रह्मण्योऽथ देवता ॥
सुं बीजं ह्रीं शक्तिः ततः परं विनियोगो विजयाय वै ।
सा(सु)मित्यादिकराङ्गस्य न्यासं मूलयुतं शिवे ॥
शक्तिहस्तं विरूपाक्षं शिखिवाहनषडाननम् ।
दारुणं रिपुरोगघ्नं भावये कुक्कुटध्वजम् ॥

**End:**

गुहमाराध्य यन्त्रे तु जपेत् स्वेष्टार्थसिद्धये ।
त्रिसहस्रजपादेव साधकस्याखिलं लभेत् ॥
अ[ख]ण्डाद्दिमेनि (नेमि) पर्यन्तं कार्येषु सकलेषु वै ।
तत्तत्कार्यार्थसिध्यन्ति(र्थे)त्रिसहस्रं जपेच्छिवे ॥

**Colophon:**

इत्याकाशभैरवकल्पे सुब्रह्मण्यमन्त्रं नाम षष्टितमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8128. षोडशाक्षरीमन्त्रोद्धारः.

## ṢŌḌAŚĀKṢARĪMANTRŌDDHĀRAḤ.

**Pages, 3.** Lines, 9 on a page.

Begins on fol. 13*b* of the MS. described under No. 5868.

On the manner of pronouncing the sixteen-syllabled Mantra addressed to Durgā.

**Beginning:**

श्रीपार्वत्युवाच—

द्वादशाक्षरमन्त्रस्य विधानं सम्यगीरितम् ।
षोडशाक्षरमन्त्रस्य चोद्धारं सम्यगीरय ॥
प्राणान्दद्याद्धनं दद्यान्मानं दद्यात्तथापि वा ।
पुत्रान् दद्यात्पशून् दद्यान्न दद्यात् षोडशाक्षरीम् ॥

* * * *

तारमादौ समुच्चार्य ततो वाग्भवमुद्धरेत् ।
कामबीजं त्रिधा कुर्यात् जातित्रितयसंयुतम् ॥

**End:**

निधिनिक्षेपसंरक्षोपसंरक्षा महाग्रहाः ॥
फलायनमनुक्तं यत् तत्सर्वं द्वादशार्णवत् ॥

---

## No. 8129. संग्रहतृचकल्पः.

## SAṄGRAHATṚCAKALPAḤ.

**Pages, 4.** Lines, 7 on a page.

Begins on fol. 92*a* of the MS. described under No. 2854.

Complete.

Gives the method of worshipping the Sun briefly by means of the three Ṛks, 11 to 13 of the 50th Sūkta in the I Maṇḍala of the Ṛgvēda.

**Beginning:**

एवङ्गुणविशेषणाविशिष्टायामस्यां शुभतिथौ छायादेवीसमेतश्रीसूर्यनारायणप्रसादसिद्ध्यर्थं तृचकल्पविधानेन सूर्यनमस्कारं करिष्ये । घण्टा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नादं कृत्वा कलशपूजां कुर्यात् । कलशोदकेन पूजोपकरणानि आत्मानं च प्रोक्ष्य तण्डुले वा विभूत्यां यन्त्रं लिखित्वा ।

**End:**

अनेन पूजाविधानेन भगवान् सर्वात्ममकश्श्रीसूर्यनारायणः प्रीणातु । जपस्थलं प्रोक्ष्य प्रतिनित्यं पूजातण्डुलमादाय पक्कं कृत्वा भोजनं चेत् अपस्माररोगान् परिहृत्य तेजस्वी भवति । सर्वजनवश्यो भवति ॥

**Colophon:**

इति तृचकल्पः ॥

---

No. **8130.** सप्तपारायणसङ्ग्रहः.

SAPTAPĀRĀYAṆASAṄGRAHAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 145*a* of the MS. described under No. **365,** wherein this is shown as Ghāṭikāpārāyaṇavidhiḥ among the other works.

Complete.

Gives in a concise form the details regarding the Saptapārāyaṇa or the seven ways in which Dēvī is to be meditated upon and worshipped.

**Beginning:**

त्रिविधं भजनं त्रिकालजं दिनानित्याघटिकाक्षराण्यपि ।
अमुकं क्रमामित्यजानतामतिदूरे खलु वादिसुन्दरी ॥
उषसि गुरुमयीं त्वां प्रातराधारवह्नौ
दिनकृति दिनमध्ये मानसे तत्त्वरूपाम् ।
शिरसि शशिनि नित्यारूपिणीं वासरान्ते
भजति गुरुकटाक्षक्षालिताशेषपापः ॥

**nd:**

गणास्त्रिधाद्रिं च शरोऽङ्कशेषं वारं गतं चोरयवर्गनाथान् ।
आ एतयाद्यर्चितवर्गनाथान् वीरार्चने मुख्यमुपासकानाम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8131. सप्तशतीमन्त्रविभागः.
## SAPTAŚATĪMANTRAVIBHĀGAḤ.

**Pages**, 18. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 5667.

Complete.

Deals with the splitting up of Dēvīmāhātmya into Mantras according to Kātyāyanītantra: by Gōvinda, son of Bhaṭṭagaṇēśa, a resident of Benares.

**Beginning:**

अथ कात्यायनीतन्त्रोक्तमन्त्रविभाग एवाभियुक्तैः स्पष्टीकृत्य दर्शितः। तथाहि—

अष्टसप्तत्युत्तराणां श्लोकानां शतपञ्चकम्।
(आन्ध्रभाषया विवृतम्)।
प्रोक्तं सप्तशतीस्तोत्रे तत्सप्तशतसङ्ख्यया ॥
विभज्य जुहुयान्मन्त्रामिति कात्यायनीमतम्।
मार्कण्डेय उवाचैकः सावर्ण्याद्यास्ततः परम् ॥
श्लोकमन्त्रास्सप्तदश अर्धश्लोकात्मकास्ततः।
एकोनविंशदेवं स्युर्वैश्योक्तिर्विंशतिस्तथा ॥

**End:**

आवृत्त्या त्वधिको मन्त्रस्सावर्णिर्भविता मनुः।
एकोनत्रिंशत्सङ्ख्याका मन्त्रा अन्ते स्मृता बुधैः ॥

**Colophon:**

इति श्रीकण्वस्य काशिवासिनः भट्टगणेशस्य सुतेन गोविन्देन विरचितः कात्यायनीतन्त्रानुसारेण सप्तशतीमन्त्रविभागः ॥

---

## No. 8132. सप्तशतीमन्त्रविभागप्रयोगः.
## SAPTAŚATĪMANTRAVIBHĀGAPRAYŌGAḤ.

**Pages**, 8. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 5667, wherein this is shown among the other works as Kātyāyanītantra.

Complete. A portion of Kātyāyanītantra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



On the manner of using the stanzas of the Dēvīmāhātmya as Mantras and repeating them so as to produce effects without delay.

**Beginning :**

यो दुर्गाकवचं हित्वा प्रतिवारं नरेश्वरः ।
स्वदेहयजनं तस्य नरकं प्रति गच्छति ॥
अन्धकश्च महादैत्यो दुर्गाहोमपरायणः । इति ।

अथ प्रयोगाः—

प्रतिश्लोकमाद्यन्तयोः प्रणवं सम्पुटीकृत्य जपेन्मन्त्रसिद्धिर्भवेत् । सप्रणवानुलोमव्याहृतिध्यानादौ । अन्ते तु विलोमेनेत्येवं प्रतिश्लोकं कृत्वा शतकृतपाठ इति शीघ्रसिद्धिर्भवतीति शतचण्डीप्रकारः।

**End :**

प्रतिश्लोकम् ऐं बीजसम्पुटितं पल्लवसहितं शतावृत्तौ शतावृतौ चेद्विद्याप्राप्तिर्भवति ॥

इति प्रयोगाः॥

**Colophon :**

इति कात्यायनीतन्त्रे मन्त्रविभागः कामनापरत्वेऽर्चनप्रयोगस्समाप्तः ॥

---

## No. 8133. सिद्धयामलतन्त्रम्.
## SIDDHAYĀMALATANTRAM.

Pages, 12. Lines, 17 on a page.

Begins on fol. 154*a* of the MS. described under No. 5593.

Paṭalas 1 to 15.

Describes how the image of Gaṇapati is to be made, and gives also particulars regarding the Mantras addressed to that deity, and the various purposes for which the Mantra may be used.

Contains the following Paṭalas :—

१ and २. गणपतिप्रयोगः.
३. गणपतिनिर्माणक्रमः.
४. वश्यप्रयोगः.
५. आकर्षणप्रयोगः.
६. कृत्रिमकर्मप्रयोगः.
७. विद्वेषणक्रमः.
८. उन्मादक्रमः.
९. प्रतिविधिक्रमः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०. स्नेहविद्वेषणक्रमः.
११. उच्चाटनक्रमः.
१२. स्तम्भनक्रमः.
१३. स्वप्नगतकार्यपरिज्ञानम्.
१४. प्रतिमाप्रयोगविधिः.
१५. गणपतियन्त्रधारणविधिः.

**Beginning:**

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
गाणपत्यं महामन्त्रं श्रोतुमिच्छामि मे वद ॥

ईश्वर उवाच—

गाणपत्यं महागुह्यं गोपनीयं प्रयत्नतः ।
तथापि तव वक्ष्येऽहं साधिकासि ममाम्बिके ॥
कृष्णाष्टम्यां समारभ्य यावत्कृष्णचतुर्दशी ।
अष्टोत्तरसहस्रन्तु प्रजपेन्नित्यमादरात् ॥
मूलमन्त्रेण तेनैव अष्टोत्तरशतं सुधीः ।
तर्पयित्वा तु मूलेन एकादश तथाहुतीः ॥
कृत्वा रहसि चासीनः मूलमष्टोत्तरं जपेत् ।

* * * *

**Colophon:**

इति प्रयोगान्तरे सिद्धयामले शक्तिगणपतिविद्यायां गर्भकौलागमे योनिसारतन्त्रे प्रथमः पटलः ॥

**End:**

शाकिनीभूतबेतालभये सर्वत्र सङ्कटे ।
निर्भयत्वमवाप्नोति नात्र कार्या विचारणा ॥
तद्यन्त्रं धारिणां पुंसां राजस्त्रीजनवश्यदम् ।
सर्वजन्तुवशश्चैव सर्वसौख्यकरं भवेत् ॥

**Colophon:**

इति श्रीसिद्धयामलतन्त्रे प्रत्यक्षसिद्धिप्रदखण्डे उमामहेश्वरसंवादे गणपतियन्त्रधारणविधिर्नाम पञ्चदशः पटलः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 8134. सिद्धारिकोष्ठनिर्णयः.

SIDDHĀRIKŌṢṬHANIRṆAYAḤ.

Pages, 4. Lines, 15 on a page.

Begins on fol. 271*a* of the MS. described under No. 424, and not on fol. 271*b* as shown therein.

Complete.

This is also called Siddhārinirṇaya.

On the method of finding out whether the repetition of a particular Mantra will be beneficial or harmful to the repeater.

**Beginning:**

नरयन्त्रं समालिख्य सप्तसप्ताद्यतारकाः ।
शिरः पादोऽधरः पृष्ठः स्वामिताराधिगण्यते ॥

शिवस्वामिनमोभृत्यापादातेष्वदरिद्रितः ।
उदरे अर्थलाभं च पृष्ठनिष्ठारमेवच(?) ॥

नृसिंहार्कवराहाणां प्रसादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धारिं नैव शोधयेत् ॥

* * * *

सिद्धसाध्यसुसिद्धादि प्रादक्षिण्येन योजयेत् ।
सिद्धसिद्धयथोक्तं स्याद्द्विगुणी सिद्धसाध्यतः ॥
तत्सुसिद्धस्तु कालेन तदरिर्हन्ति बान्धवान् ।

**End:**

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराञ्जलिं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि रहस्यकं(भासुरं) तदभिधानपूर्वं गुरुः ॥

---

No. 8135. सिद्धारिकोष्ठप्रकरणम्.

SIDDHĀRIKŌṢṬHAPRAKARAṆAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 757.

Incomplete.

Similar to the above

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

स्वनामाक्षरमारभ्य यावन्मन्त्रादि गण्यते ।
त्रिभिर्वृद्ध्या स्वरैर्भिध्य(द्य)शेषमृणिऋणीभवेत् ॥
मन्त्राद्यक्षरमारभ्य नामाक्षर्यादि गण्यते ।
त्रिभिर्वृद्ध्या स्वरैर्भिद्य शेषमृणिऋणीभवेत् ॥

**End:**

देशे दुर्गपुरे ग्रामे मन्त्रमौषधदेवता ।
स्वामिनो गुरुभृत्यांश्च रिपुवर्णस्त्वरिष्टदः ॥

---

## No. 8136. सिद्धारिकोष्ठप्रकारः.

## SIDDHĀRIKOṢṬHAPRAKĀRAḤ.

**Pages, 8.** Lines, 9 on a page.

Begins on fol. 120*a* of the MS. described under No. 4384.

Complete.

Similar to the above.

**Beginning:**

अथ सिद्धारिकोष्ठप्रकारो लिख्यते—

सिद्धसाध्यस्तु सिद्धारिं क्रमाद्बूयो विचक्षणः ।
पूर्वापरक्रमं कृत्वा . . . . . प्रकल्पयेत् ॥

* * * *

क्रमेण ककारादितकारान्तान् षोडश वर्णान् विलिख्य पुनस्तेनैव क्रमेण थकारादिसकारान्तांश्च षोडश वर्णान् विलिख्य ।

**End:**

नामाद्यक्षरमारभ्य यावन्मन्त्रादिदर्शनम् ।
त्रिधा कृत्वा स्वरैर्हित्वा तदन्यद्विपरीतकम् ॥
कृत्वाधिक ऋणी ज्ञेयः ऋणी चेन्मन्त्रमुत्तमम् ।

* * * *

प्रसिद्धं न च गृह्णीयात् सुप्तो येन च जागृयात् । इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8137. सिद्धारिचक्रम्.
## SIDDHĀRICAKRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 65*a* of the MS. described under No. 673.

Complete.

The agreeablity of a particular Mantra in relation to one's self is found out with the help of this Cakra.

Similar to the above.

**Beginning:**

अध्यग्निरुद्रग्रहनेत्रवेदरवेदशारिर्वसुषोडशाश्च ।
मन्वन्तरे बाणतुरङ्गपक्षास्त्रयोदश स्युर्वेदवर्णमाह ॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिवर्णतः ।
सिद्धसाध्यसुसिद्धादि प्रादक्षिण्येन योजयेत् ॥

**End:**

महाविद्यां च गायत्रीं बालां पञ्चाक्षरीं तथा ।
नारायणं मन्त्रराजं सिद्धारिर्नैव शोधयेत् ॥
नृसिंहार्कवराहाणां प्रासादप्रणवाक्षरम् ।
पिण्डिताक्षरमन्त्राणां सिद्धारिर्नैव शोधयेत् ॥

---

## No. 8138. सिद्धारिचक्रलक्षणम्.
## SIDDHĀRICAKRALAKṢAṆAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 62*b* of the MS. described under No. 5885

Incomplete.

Similar to the above.

**Beginning:**

सिद्धसाध्यसुसिद्धारीन् प्रादक्षिण्येन योजयेत् ।
सिद्धसिद्धौ यथोक्तस्तु द्विगुणस्सिद्धसाध्यतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धिस्सुसिद्धसिद्धिस्स्यात् सिद्धारी हन्ति बान्धवान् ।
सुसिद्धसिद्धोऽर्धजपात् साध्यं स्यात्साधितो भवेत् ॥

**End:**

तदूर्ध्वे बीजसम्बोधं बीजपार्श्वकुरुद्वयम् ।
अग्निजायासमेतं तु साध्यनाम लिखेत्क्रमात् ॥

---

No. **8139.** सिद्धिकरयोगाविशेषाः.

SIDDHIKARAYŌGAVIŚĒṢĀḤ.

**Pages**, 26. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 7991, wherein this has been omitted to be shown among the other works.

On the methods of realising certain desired objects with the help of Mantras and recipes.

**Beginning:**

[द]दर्श(श)मासान्न जीवन्ति . . . . . . ।
. . . . सश्व वा शुष्कं वा तालुदेशकम् ॥
बुद्धौ वा भग्नमायाति षण्मासान्ते न जीवति ।
यजते(शयने)यस्य वा नित्यं यूका वा मक्षिकादयः ॥
त्यजन्ते(न्ति) वैरबाधास्यात्(च) षण्मासान्ते न जीवति ।
कालज्ञानमिदं ज्ञात्वा तस्य कुर्वीत वञ्चनम् ॥

* * * *

ओं नमस्सर्वभूताधिपतये ग्रस ग्रस शोषय शोषय भैरवि आज्ञापयति स्वाहा । उक्तयोगानामयमेव मन्त्रः ।

अधरं कृकलासस्य सजुङ्कारं च मज्जकम् ।
पिष्ट्वा तद्गुलिकां कुर्यात्रिलोहेन तु वेष्टयेत् ॥
तां वक्त्रे धारयेद्योऽसौ क्षुत्पिपासा न बाधयेत् ।

**End:**

कापिकच्छु(च्छु)करोमाणि निक्षिपेत्तत्र बुद्धिमान् ।
तदुलङ्घनमात्रेण सर्पो बद्धो भवेद्ध्रुवम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 8140. सीतारामयन्त्रोद्धारः.
## SĪTĀRĀMAYANTRŌDDHĀRAḤ.

**Page,** 1. Lines, 5 on a page.

Begins on fol. 37*b* of the MS. described under No. 514.

Complete.

On the method of drawing the Yantra relating to Sītārāmamantra and of filling it up with the syllables of the Mantra.

**Beginning:**

नवषोडशबाणविरिश्विमुखं गिरिलोचनरुद्रमनुप्रयुतम् ।
रविविश्वसुमङ्गलसु(दं शु)भदं रसरामदशातिथियन्त्रमिदम् ॥
अहिचोरविचार(ण)वैरिहतं ग्रहभूतपिशाचविनाशकरम् ।
विषमज्वररोगनिवृत्तिकरं नवनाथसमश्चितयन्त्रमिदम् ॥

**End:**

वेदाग्निवसवश्चैव इन्दुबाणसरन्ध्रकैः ।
नेत्रे मुनिरसाश्चैव यन्त्रो निगलमोचकः ॥

**Colophon:**

सीतायन्त्रोद्धारं संपूर्णम् ॥

---

## No. 8141. सुदर्शनमन्त्रकल्पः.
## SUDARŚANAMANTRAKALPAḤ.

**Pages,** 12. Lines, 9 on a page.

Begins on fol. 12*a* of the MS. described under No. 124.

Contains Adhyāyas 9 to 12 complete and 13 incomplete.

On the details connected with the Sudarśanamantra, such as its uses, efficacy, the manner of pronouncing it, etc.

९. सुदर्शनमन्त्रोद्धारणम्.
१०. सुदर्शनमन्त्रप्रयोगः.
११. मन्त्रमाहात्म्यम्.
१२. यन्त्रान्तरविधिः.

**Beginning:**

प्रणम्य देशिकान् सर्वान् वेदान्तार्थविशारदान् ।
सौदर्शनादिमन्त्राणां सङ्ग्रहः क्रियतेऽधुना ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुदर्शनस्य माहात्म्यं पञ्चरात्रे प्रपञ्चितम् ।
सर्वरक्षाकरञ्चैतत्सर्वशत्रुविदारणम् ॥
अस्त्रग्रामस्य सर्वस्य नायकस्स्यात्सुदर्शनम् ।
येनाप्रतिहतो मन्त्री भवत्यतिबलैरपि ॥

* * * *

**Colophon:**

इति मन्त्ररहस्ये सुदर्शनमन्त्रोद्धारणं नाम नवमोऽध्यायः ॥

* * * *

**Colophon:**

इति सुदर्शनमन्त्ररहस्ये द्वादशोऽध्यायः ॥

**End:**

उद्वर्तनञ्चाष्टजलं पञ्चगव्यं पुनर्जलम् ।
पुण्यतीर्थोदकञ्चैव सुगन्धामलकादिकम् ।
वस्त्रं यज्ञोपवीतञ्च तथाचमनचन्दने ।
भूषणानि च पुष्पाणि धूपदीपादिकानि च ॥
पायसान्नं गुडान्नञ्च घृतापू.

---

No. **8142.** सुदर्शनमन्त्रकल्पः.

SUDARŚANAMANTRAKALPAḤ.

**Pages,** 16. Lines, 18 on a page.

Begins on fol. 327*a* of the MS. described under No. **5477,** and is included in Mantramālikā 273*a* shown among the other works therein.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीप्रकारान्तरसुदर्शनमन्त्रस्य अहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनमहाविष्णुर्देवता . . . . . . . . . .
अनेनोक्तप्रकारेण मन्त्रेण अग्निप्राकारं भावयेत् ।

466-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अक्षरन्यासः—

तारं तु मूर्ध्न्यथ सितारुणकृष्णवर्णं मध्ये भ्रुवोश्च समदे वदने हकारम् ।
हृद्बाहुजानुपदसन्धिषु चावशिष्टान् वर्णान् न्यसेदिति तनौ पुनरग्निवर्णान् ॥

* * * *

षट्कोणान्तस्थतारं विलिखितसममन्त्राक्षरं सन्धिराजत्-
स्वाङ्गं वोहे(बाह्ये) कलाकेस्म(स)रमुदरगताष्टाक्षराण्यष्टपत्रम् ।
पद्मं पत्रैर्विराजद्विकृतिदललसत्षोडशार्णं त्रिवीतं
वो(व्यो)मान्त्यार्णं स्वनाम्ना विरचितगुणपाशाङ्कुशश्चारियन्त्रम् ॥

**End:**

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥

**Colophon:**

इति सुदर्शनकल्पं सम्पूर्णम् ॥

---

## No. 8143. सुदर्शनयन्त्रः.
## SUDARŚANAYANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 20*a* of the MS. described under No. 7517.

Incomplete.

On the manner of drawing the Sudarśanayantra.

**Beginning and End:**

अथ कलशपूजार्थं यन्त्रमण्डलं लिख्यते ।
भूमौ तण्डुलमाकीर्य तस्मिन् दर्भाग्रेण यन्त्रं विलिखेत् ।
अयं न्या(सः) सर्वत्र कलशविधौ समानः ।

षट्कोणान्तस्थतारं विवरलिखितमन्त्राक्षरं सन्धिराजत्
स्वाङ्गं बाह्ये तले च स्वरमुदरगताष्टाक्षरश्चाष्टपद्मम् ।
(पद्मं)वर्णैर्विराजद्विकृतिदललसत्षोडशार्णत्रिवीतं
व्यो . . . नाम्ना . . . . . रचितपाशाङ्कुशं चक्रयन्त्रम् ॥
चक्रेशाय नमः . . . . . जगन्नाथाय नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **8144.** सुदर्शनयन्त्रः.

SUDARŚANAYANTRAḤ.

**Pages,** 3. **Lines,** 7 on a page.

Begins on fol. 54*a* of the MS. described under No. 5924.

Incomplete.

Similar to the above.

**Beginning :**

आदौ षट्कोणं लिखित्वा षट्कोणमध्ये . . . . . . सर्वराजवश्यं जनवश्यं शत्रुपलायनेति नाम लिखित्वा कोणमध्ये वह्निबीजं निधाय ।

**End :**

यं रं लं वं शं षं सं हं ळं क्षं श्रीरामदूताय नमः इति भूपुरवेष्टनम् ॥

---

No. **8145.** सुदर्शनयन्त्रः.

SUDARŚANAYANTRAḤ.

**Pages,** 8. **Lines,** 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5680.

Complete. Contains also Prāṇapratiṣṭhāmantra.

Similar to the above.

**Beginning :**

आदौ षट्कोणं विलिख्य तन्मध्ये सुदर्शननाम लिखित्वा तदधः ओं ह्रीं श्रीं क्षैं ऐं क्लीं उं क्षूं क्षौं हुं रां क्षूं इति द्वादश बीजानि लिखित्वा षट्कोणेषु षडक्षरीं कोणसन्धौ ओं नमो विष्णवे इति विष्णुषडक्षरीं लिखित्वा कोणाग्रेषु रां रामाय नम इति रामषडक्षरीं लिखित्वा तदुपरि ह्रीमिति मायाबीजेन संवेष्ट्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

सर्वेन्द्रियाणि वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राण इहैवागत्य आगत्य सुखं चिरं तिष्ठेत् (:) स्वाहा क्रों ह्रीं अं हं सस्सो हं स्वाहा ॥

माडपूशि श्रीनिवासराघवस्य स्वहस्तलिखितम् ॥

---

No. **8146.** सुदर्शनयन्त्रः.

SUDARŚANAYANTRAḤ.

**Pages, 5.** Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 5680, and forms a portion of Sudarśanamantra, 5*a*, shown among the other works therein.

Complete.

Similar to the above.

**Beginning:**

षट्कोणान्तस्थतारं विवरलिखितमन्त्राक्षरं सान्धिराजत्-
स्वाङ्गं बाह्ये शि(क)लाकेसरमुदरगताष्टाक्षरं चाष्टपत्रम् ।
पद्मं वर्णैर्विराजद्विकृतिदल(ल)सत्षोडशार्णं द्विवीतं
यो(व्यो)मान्त्यार्णं स्वनाम्ना विरचितगुणपाशाङ्कुशं चक्रयन्त्रम् ॥

**End:**

मन्ये तारं तदनु शमनं वर्णशः कोणषट्के
बाह्ये चाङ्गं लिखितकनके रूप्यके वापि पत्रे ।
पाषाणे वा पि जप्त्वा (रिपुजनगृहे क्वापि) संस्थापितं तत्
चक्रं चोरग्रहरिपुभयध्वंसरक्षाकरं च ॥

---

No. **8147.** सुदर्शनयन्त्रः.

SUDARŚANAYANTRAḤ.

**Pages, 16.** Lines, 4 on a page.

Begins on fol. 46*a* of the MS. described under No. **7777.**

Incomplete.

Similar to the above.

For Private and Personal Use Only

